

Bill No. 3/07-08

6

2008-0157

भावकुतूहल of जीवनाथ मैथिल - Edited by पं० मदनमोहन मिश्र - title page missing, but probably published from दरभंगा राज प्रेस, दरभंगा, 1922 Vikram era.

27






भावकुतूहल: ज्योतिषग्रन्थ

पत्र- ३४ इश्तेहार। समग्र-

सब लोगोंको यह जनाय दिया जाता है कि यही भाव कुतूहल ग्रन्थको दस्तूर मोताबिक् गवर्णमेण्टके होम डिपार्टमेण्ट नाम कचहरीमे जाय मै आपने नाममे रेजेष्टरी करवाय ल्यायाहुं अगर कोई इस ग्रन्थके कोई अंशको बदल कर या जैसा है तैसा छपवावे तो उसको गवर्णमेण्टसे मोनासिब सजा मिलेगी।

श्रीमदनमोहन मिश्र

श्रीद्वारिकालालस्य



भा० कु०
१

श्रीगणेशायनमः॥ महः सेतुं हेतुं सकलजगतामङ्कुरतया सदा शंभोर्भाभवभवभयत्राणजनकम्। अहं वन्दे म
न्दस्मितसुरमनोमोदनिकरं चिदानन्दं पादामलकमललावण्यमधिकम् ॥ १ ॥ विचारसंचारचमत्कृतं यन्मतं मुनी
नां प्रविलोक्य सारम्। श्रीजीवनाथेन विदां हिताय प्रकाश्यते भावकुतूहलं तत् ॥ २ ॥ धात्रोदितं यवनकर्कशशब्दस
ङ्गादाधिव्यथाविदलितं परमं फलं यत्। तत्कोमलामलरवामृतराशिधारास्नानं करोतु जगतामपि मोदहेतोः ॥ ३ ॥
अथ द्वादशभावाः ॥ तनुकोशसहोदरबन्धुसुता रिपुकामविनाशशुभा विबुधैः। पितृभं तत आप्तिरपाय इमे क्रमतः क
थिता मिहिरप्रमुखैः ॥ ४ ॥ अथ राशिपाः ॥ कुजकवी बुधचन्द्रदिवाकरा बुधसितावनिजा गुरुसूर्यजौ। शनिगुरू च
पुरातनपण्डितैरजमुखादुदिता भवनाधिपाः ॥ ५ ॥ अथ मित्रसमरिपवः ॥ अङ्गारकेन्दुगुरवो रविचन्द्रपुत्रावादित्य
चन्द्रगुरवः कविचण्डभानू। भौमार्करात्रिपतयो बुधसूर्यपुत्रौ शुक्रेन्दुजौ दिनकरात्सुहृदो भवन्ति ॥ ६ ॥ सौम्याः
समाश्च सकलाः कविभानुपुत्रौ मन्देज्यभूमितनया रविजः क्रमेण। भौमेज्यकौ सुरगुरू रिपवोऽवशिष्टास्तात्कालिका
व्ययधनायदशत्रिबन्धौ ॥ ७ ॥ परमोच्चमजे दशभिर्वृषभे शिखिभिर्मकरे गजयुग्मलवैः। तिथिभिर्युवतीभवने विधुभे
किल पंचभिरेव झषे विधनैः ॥ ८ ॥ कृतिभिश्च तुलाभवने रवितः कथितं मदने खलु नीचमतः। मिथुने तमसः

मं- शु बु- चं सू बु- शु- मं बृ- श श- बृ


१२ २ ११ १० ३ ४

मेषादिकराशियों
राशिपति तीनकहैहैं

शिखिनो धनुषि प्रथमे बुधभे गुरुभे भवनम् ॥ ९ ॥ अथ षड्वर्गं साधनम् ॥ होराराशिदलं समे प्रथमतश्चन्द्रस्य भानोर
मो व्यत्यासादसमे द्रेकाणपतयः स्वाद्याङ्कभावाधिपाः । मेषाद्यादिमभे वृषे तुमकराद्युग्मे घटादिन्दुभे कर्कादेव नवांश
का निगदिताः स्युर्द्वादशांशाः स्वभात् ॥ १० ॥ पंचपंचाष्टशैलाद्याः त्रिंशांशा विषमे क्रमात् । भौमभानुजजीवज्ञशुक्रा
णामुत्क्रमात्समे ॥ ११ ॥ चरणविहृद्गा खेटा दशमस्थहोत्थे १०।३ त्रिकोणभे ५।९ जमने । चतुरस्रे ऽथकलत्रे प्रयत:
पश्यन्ति तत्फलं क्रमतः ॥ १२ ॥ चरस्थिरद्विस्वभावाः क्रूराक्रूरावजादितः । नरनारीक्रमादेव विषमाख्यसमावपि
॥ १३ ॥ मिथुनं धन्विपूर्व्वार्द्धं तुला कन्याघटो नराः । चतुःपदा धनुः सिंहवृषमेषा मृगादिमः ॥ १४ ॥ मूलत्रिकोणम
र्कादेः सिंहोवृषभे आदिमः । कन्याधनुस्तुलाकुंभः प्रवदन्ति पुरातनाः ॥ १५ ॥ इति भावकुतूहले संज्ञाध्यायः ॥
आदित्यादष्टमे पापः पीड़ितो दशमाधिपः । तदापि तुर्म्महाकष्टं निधनं वेति कीर्त्तितम् ॥ १ ॥ भवति यदिशशाङ्कः
पापयोरन्तराले जनुषि सुखनगस्थैः पापखेटैः शशाङ्कात् । विधुरपि बलहीनो नष्टकान्तिर्ज्जनन्या निधनमपिविशे
षादाकुराचार्य्यवर्य्याः ॥ २ ॥ यदापापखेचारिणो जन्मकाले धरानन्दनाक्रान्तभावात्सहोत्थे । तदैवाशुनाशं सहोत्थ
स्य धीरा मणित्थादयः प्राकुराचार्य्यमुख्याः ॥ ३ ॥ बुधाराशिभावे तु पापा भवन्ति द्रुतंचोपि नीचाश्रितो नष्टवीर्य्यः ।

तद मातुलानां विनाशो विशेषादिति शङ्कराचार्य्यवर्य्यां नराणाम् ॥ ४ ॥ बृहस्पतेः पंचमभावसंस्था महीज
मन्दागुदिवाकरास्चे त् । गुरोरपत्याधिपतिः सपापः तदात्मजानां विरतिं वदन्ति ॥ ५ ॥ चेत्कवेरङ्गनागारगा
मी दिनेशो विनाशोऽङ्गनायाः सपापो निरुक्तः। नैधने मन्दतः पापखेटा बलिष्टा च्छूणां नैधनं सत्वरं सन्दिशन्ति
॥ ६ ॥ इति भावकुतूहले द्वितीयोध्यायः ॥ अथ जातकचिह्नज्ञानम् ॥ जनुषि लग्नगतो वसुधासुतो मदन
गोऽपि गुरुः कविरेव वा । भवति तस्य शिरो व्रणमण्डितं निगदितं यवनेन महात्मना ॥ १ ॥ भवति लग्न
गते वसुधासुते भृगुसुतेऽपि विधाविह जन्मिनाम्। शिरसि चिह्नमुदाहृतमादिभिर्मुनिवरैर्द्विरसाब्दसमासतः ॥ २ ॥
भार्गवे जनुरङ्गस्थे चाष्टमे सिंहिकासुते। मस्तके वामकर्णे वा चिह्नदर्शनमादिशेत् ॥ ३ ॥ मदनसदनमध्ये सिंहिकान
न्दने वा सुरपतिगुरुणा चेदङ्गराशौ युते नुः। प्रकथितमिह चिह्नं चाष्टमापायभावे कविरपि गुरुरङ्गे वामबाहौ मुनीन्द्रैः
॥ ४ ॥ लाभारिसहजे भौमे व्यये शुक्रेण संयुते। वामपार्श्वगतं चिह्नं विज्ञेयं व्रणजं बुधैः ॥५॥ लग्ने क्षितिसुते मन्दे शुक्राढ
ये त्रिकोणभे। लिङ्गे गुदसमीपे वा तिलकं सन्दिशेद्बुधः ॥ ६ ॥ सुतालये भाग्यनिकेतने वा कवी यदा चाष्टमगौ
सजीवौ। शनौ चतुर्थे तनुभावगे वा तदा सचिह्नं जठरं नरस्य ॥ ७ ॥ धने कवावष्टमलग्नभे वा दिवाकरे मन्दकुजौ स

तीये । कटिप्रदेशे प्रवदेन्नराणां चिह्नं विशेषादिह जातकज्ञः ॥ ८ ॥ पातालस्थौ राहुशुक्रौ लग्ने मन्दः कुजोऽपि वा ।
पादमूलेऽथवा पादे वामे चिह्नं विनिर्दिशेत् ॥ ९ ॥ व्यये गुरौ विधौ भाग्ये लाभारिसहजे बुधे । गोलकं गुदमध्यस्थं
व्रणं वा प्रवदेद्बुधः ॥ १० ॥ दिनपतौ नवमे हरिभे यदा सहजहानिरवश्यमिहाङ्गिनाम् । धनगते रविजे
तनुगे गुरावगुरगे जननी नहि जीवति ॥ ११ ॥ सुरगुरौ धनभावगते यदा कुजयुते शनिनापि च जन्मिनाम । अगु
युते सहजे सहजासुखं निगदितं यवनैः प्रथमोदितम् ॥ १२ ॥ अरिनिकेतनगेऽवनिनन्दने भवति राहुयुते
निधने शनौ । निगदितं सहजो जनिमात्रतो यमपुरं व्रजतीति पुरातनैः ॥ १३ ॥ इति भावकुतूहले तृती
योऽध्यायः ॥ ३ ॥ अथारिष्टाध्यायः ॥ तुहिनकिरणहोरिका च सम्बराभचरमगाः खल खेचरा जनौ चेत् । मृति
रथ रजनीशपापखेटैरखिलचतुष्टयगैर्विनाशमेति ॥ १ ॥ अशुभेषु शुभेषु चक्रपूर्वापरभागेषु गतेषु कीटलग्ने । विर
तिं समुपैति बालकोऽयं खलखेटैरपि कामिनीतनुस्थैः ॥ २ ॥ खलखगसहितो निशाकरोऽयं तनुमृतिमारगतो हि
जन्मकाले । मृतिपदमुपयाति देवबालोऽपि च सकलैरवलोकितो न सौम्यैः ॥ ३ ॥ अशुभावगोदयगतौ शुभदैरवलो
कितो न खलुयुक्तविधुः । मृतिरन्त्यगे कृशविधौ कुगजागभगैः खलैरपि विकेन्द्रशुभैः ॥ ४ ॥ शीतांशावरिविरतिस्थिते




विनाशः पापैः स्यात्सपदि युतेक्षितेपि जन्तोः । अष्टाब्दैः शुभखचरैश्च मिश्रखेटैर्वै द्वाब्दैरपि मुनिभिर्निरुक्तमेतत् ॥ ५ ॥
अरिविरतिगते शुभे च दृष्टे बलसहितेन खलेन माससमायुः । मदनसदनगेपि लग्ननाथे खलविजिते ध्रुवमस्य मास
मायुः ॥ ६ ॥ क्षणशशिनि तनौ खलोऽष्टकेन्द्रे मृतिरथशीतरुचौ खलान्तराले । मुनिहिबुकलयस्थितेपि लग्ने मुनिख
यगैश्च सहाम्बया खलैः स्यात् ॥ ७ ॥ भविरतिगतशोभनैरदृष्टे शशिनि नवेषुगतैः खलैर्मृतिः स्यात् । तनुगतहिमगौ
खले नगस्थे मृतिरुदिता मुनिभिः शिशोरवश्यम् ॥ ८ ॥ असुरमुखगते खलेन युक्ते तनुगविधौ सममम्बयालयारे ।
मृतिरथतनुगे रवौ सशस्त्रं ग्रहणगते खलसंयुतेपि मृत्युः ॥ ९ ॥ सबलशुभखगैर्युते न दृष्टेतुहिनकरे दिनपेथवा तनौ
चेत् । निधनमवसुताश्रिताः खलाः स्युर्निधनमिहाशु वदन्ति वै मुनीन्द्राः ॥ १० ॥ शनिरविविधुभूमिजैः क्रमेण व्यय
मवलग्नलयाश्रितैर्मृतिः स्यात् । सबलसुरपुरोहितेन दृष्टैर्नहिमरणं गदितं तदा मुनीन्द्रैः ॥ ११ ॥ लयमारलग्नव
धीव्ययगः खलखेचरेण सहितः सितगुः । अवलोकितो नहि युतश्च शुभैर्नियतं भवेत्समरणाय तदा ॥ १२ ॥ बलियोग
कारकखगाश्रितभे जनिभे तनावपि यदास्ति विधुः । बलसंयुतः खलजदृक्सहितः शरदन्त एव मृतिदः स तदा
॥ १३ ॥ इति भावकुतूहले अरिष्टाध्यायः ॥ अथारिष्टभङ्गाध्यायः ॥ भवतीन्दुरथो शुभान्तराले परिपूर्णः किर

योगे जन्मकाले । विनिहन्ति तदाशु दोषसंघानिभसंघानिव केसरी बलिष्ठः ॥ १ ॥ यदि जनुषि निशाकरोऽरि
भावे गुरुकविचन्द्रजवर्गगो विशेषात् । शमयति बहुकष्टजालमद्धा मुरहरनाम यथाऽघसंघतापम् ॥ २ ॥ दिव
सकलनभोगवीक्ष्यमाणो लसिततनुर्जनुरिन्दुरेव सद्यः । द्विविधजनितं निहन्ति दोषं खगपतिराशु यथाभुजङ्ग
जालम् ॥ ३ ॥ भवति यदि तनोः क्षपाकरोयं मृतिभवने शुभखेटवर्गगश्चेत् । गदविकलतनुं पितेव बालं किल
परितः परिरक्षति प्रसन्नः ॥ ४ ॥ शुभभवनगतस्तृतीयभागे जनिसमये कविनावलोकितश्चेत् । शमयति सकलं
शशीत्वरिष्टं जलमिव पावकमङ्गिनामतीव ॥ ५ ॥ बलवानपि केन्द्रगो विशेषादिह सौम्यो यदि लाभगो दिनेशः ।
शमयत्यखिलामरिष्टमालामपि गाङ्गं हि जलं यथाघजालम् ॥ ६ ॥ भवति हि जनुरङ्गपो बलिष्ठः सकलशुभैरवलो
कितो न पापैः । इह मृतिमपहाय दीर्घमायुर्वितरति वित्तसमुन्नतिं विशेषात् ॥ ७ ॥ सुरपतिगुरुरङ्गधामगामी नि
जपदगोपि च तुङ्गतामुपेतः । बहुतरखगजं निहन्ति दोषं हरिरिभयूथमुपागतं हि यद्वत् ॥ ८ ॥ गुरुसितबुधवर्गगा
हि पापाः सकलशुभैरवलोकिता यदि स्युः । खगकृतमपि वारयन्ति रिष्टं तृणराशीनिव वह्निबिन्दुरेव ॥ ९ ॥ सहज
रिपुगतोथलाभगो वा सकलशुभैरवलोकितो युतो वा । भृगुरिह विनिहन्ति रिष्टजालं मगजाधीश इवाधिमापरा




शिम् ॥ १० ॥ अधिकबलयुता जनुर्भभोगा यदि सकला नरराशिगा भवन्ति। हितभवननिजोच्चगे हगावा बहुतरमा
शुभयं प्रयाति रिष्टम् ॥ ११ ॥ इति भावकुतूहले अरिष्टभङ्गाध्यायः ॥ * ॥ अथ पुत्रभावविचाराध्यायः ॥ नन्दनाधि
पतिना युतेक्षितं नन्दनं शुभनभोगसंयुतम् । नन्दनागमनमेव सत्वरं व्यत्ययेन नहिनन्दनागमः ॥ १ ॥ अङ्गा
धिपे लग्नगते तृतीये धनालये वा प्रथमं सुतः स्यात् । सुखे यदा लग्नपतौ नरस्य कन्या सुतो वेतितस्य कन्या ॥ २ ॥
यावन्मितानामिह पुत्रभावे नरग्रहाणामिह दृष्टयःस्युः । तावन्त एवास्य भवन्ति पुत्राः कन्यामितिः स्त्रीग्रहदृष्टितुल्या
॥ ३ ॥ सहजभावपतिः सहजे यदा तनुगतो धनगो व्ययगोऽपि वा। सुतगतः सुतहानिकरो नृणां बुधवरैरुदितो मि
हिरादिभिः ॥ ४ ॥ शुक्राङ्गारनिशाकरा हितनुगाः सन्तानसौख्यं नृणामादौ संजनयन्ति जन्मसमये चापं विना
प्रायशः । मीने वा धनुषि प्रमाणपटवः सन्तानभावो यदा सन्तानं न तदामनन्ति विबुधाः पुंसां विशेषादिह ॥ ५ ॥
अर्के कर्कगते हरौ भृगुसुते मन्दे तुलायामजे चन्द्रे यस्यनरस्य जन्मसमये वीर्य्यच्युततोऽसौ भवेत् । लग्ने चन्द्रयुते गुरौर
विसुते पुत्रेपि वीर्य्यच्युतो जीवेऽङ्गे सरवौ सुतावपि कुजे क्लीवत्वगे काएटके ॥ ६ ॥ कन्याराशिगते लग्ने बुधमन्दावलो
किते । शनि स्वोच्चगते शुक्रे वीर्य्यहीनो नरो भवेत् ॥ ७ ॥ नीचे गुरौ भृगौ वापि समे च विषमे रवौ। तदापुन

सुखं न स्यादित्युक्तं गर्गकोक्तमैः ॥ ८ ॥ कर्कटे तु कलानाथे पापयुक्तेक्षिते यदा । मन्ददृष्टे दिवानाथे पुत्रः षष्टिमि तेऽब्दके ॥ ९ ॥ पापभे पापसंयुक्ते जन्मलग्ने रवावलौ । युग्मभे वसुधापुत्रे खगुणाब्दात्परं सुतः ॥ १० ॥ अलौ गुरुक वी लग्ने भवेतां चन्द्रजार्कजौ । नपश्यति सुतं गेहे वर्षकोटिशतैरपि ॥ ११ ॥ मन्देन्दुदृष्टो रिपुसंयुतोङ्गाधिपो रविः शत्रु धने विपुत्रः । मन्दोरिगेहे बुधसूर्य्यचन्द्रैर्दृष्टो विलग्ने खलवीक्षिते वा ॥ १२ ॥ मन्दालयेर्के खलदृष्टियुक्ते लग्नेपि वा पापखगस्य वर्गे । अपत्यहानिः कुलदेवकोपात्पुरातनैरङ्गभृतां निरुक्ता ॥ १३ ॥ अपत्यभावेयदिमङ्गलः स्यात्पत्यराशिं विनिहन्ति सद्यः । अस्तांशगे पापयुते सुतेशे तदा नसन्तानसुखं वदन्ति ॥ १४ ॥ गुरोः सुतागारपतिः सपापो बलेन हीनो मनुजो विपुत्रः । अरावपाये निधने तदीशः सुतेन हीनो मनुजस्तदानीम् ॥ १५ ॥ तथैव भानुः खलु पंचमस्थो जातं च जातं विनिहन्ति बालम् । लग्नेश्वरः पापयुतः सुतेशो व्ययाष्टभे पुत्रसुखेन हीनः ॥ १६ ॥ यदागुरुसूर्य्यारशनैस्चराणां दोषो यदा जन्मनि मानवानाम् । वंशेशकोपेन सुतस्य नाशं तदा वदन्तीति पुराणविज्ञाः ॥ १७ ॥ बुधशुक्रकृते दोषे सुताप्तिः शिवपूजया । गुरुचन्द्रकृते दोषे यन्त्रमन्त्रौषधीबलात् ॥ १८ ॥ राहुणा कन्यादानं भानुना हरिकीर्त्तनम् । शिखिना कपिलादानं मन्दाराभ्यां षडङ्गकम् ॥ १९ ॥ सर्वदोषविनाशाय सन्ता



नरहरिपूजनम् । कुर्य्याद्धोमव्रतं चापि कामदेवव्रतं नरः ॥ २० ॥ * ॥ इति भावकुतूहले पुत्रभावनिरूपणाध्यायः ॥
अथ राजयोगाध्यायः ॥ खेटा यदा पंच निजोच्चसंस्थाः ससार्वभौमः खलु यस्य सूतौ । त्रिभिः स्वतुङ्गोपगतैः स राजा नृपालबालोऽन्यसुतस्तु मन्त्री ॥ १ ॥ गुरावुच्चे केन्द्रे भवति दशमे दानवगुरौ जनुःकाले मुद्रा विलसति समुद्रावधि भुवम् । गुरौ कर्के चापे भवति च सचन्द्रे दिनमणौ बुधे तुङ्गे लग्ने बलवति खगे वा नरपतिः ॥ २ ॥ गुरावङ्गे कर्के मदनसुखभावे दिनमणेः सुते शुक्रे वक्रे प्रभवति जनेर्य्यस्य समयः । महाम्भोधेर्नीरं गमनसमये तस्य करिणां चलद्घण्टानादाद्व्रजति चपलत्वं हि परितः ॥ ३ ॥ अजे जीवादित्यौ दशमभवने भूमितनयः तपःस्थाने शुक्रो बुधविधुयुतो यस्य जनने । गजानामालीभिर्विजयगमने तस्य सहसा समाक्रान्ता पृथ्वी व्रजति चकिता मोहपदवीम् ॥ ४ ॥ कन्याङ्गे सबुधे झषे सुरगुरौ भूपुत्रसूर्य्यावलौ मन्दे कर्कगते शरासनगते शुक्रे यदीया जनिः । तस्यालं शिरसा वहन्ति वसुधाधीशाः सदा शासनामानन्दाद्विकचा रविन्दकलिकामालामिव प्रायशः ॥ ५ ॥ भाग्ये भानुसुतो मृगे धरणिजो जीवज्ञशुक्राः सुते तिष्ठन्ति प्रबला दिवाकरकरव्यासङ्ग मुक्ता यदा । तत्रोद्भूतजनस्य यानसमये प्रोत्तुङ्गवाजिव्रजव्यक्तन्यस्तपदप्रचाररजसाच्छन्नं नभोमण्डलम् ॥ ६ ॥ यदि तुलामकरालिकुलीरगे रविमुखाः सकला विलस



न्ति चेत् । इह चतुष्कमहोदधिसंज्ञकः सुरपतेः समतां तनुते नृणाम् ॥ ७ ॥ राजयस्वामी निजोच्चे भवति तनु

धनापत्यपातालकान्तापुण्यानामध्वराशौ पतय इह यदा वीर्य्यवन्तो भवन्ति राजानो यस्य तस्य प्रबलबलघटा

दन्तिघंटाधनुर्जयाटङ्कारव्रातभीता जगदुदरगताः कम्पभावं भजन्ति ॥ ८ ॥ येषामङ्को निजोच्चे प्रभवति मकरे

मङ्गलो वैरिभावे दैत्येज्यः कर्म्मगामी शनिरपि सहजे जन्ममात्रेण तेषाम् । पृथ्वी सद्दानतोयार्णवजनितयशश्चन्द्र

कान्तयाज्जुनाभा मत्तोन्मत्तप्रचण्डप्रबलरिपुशिरोमण्डले वज्रपातः ॥ ६ ॥ संबन्धोदशमाधिपस्य नवमाधीशेन येषां

जनुः काले पंचमभावपेन च बलोपेतस्य तुल्येन चेत् । प्रस्थाने सति लीलया तनुभृतां वश्यारिविश्वंभरा गर्ज्जद्घो


टकमत्तवारणघटाक्रान्ता समन्ताद्भवेत् ॥ १० ॥ राजेशो यदि देवतालवपदे पारावतांशे तपःस्थानेशो धन

योपि गोपुरलवे लाभाधिपो जन्मिनाम् । चंचत्तुङ्गतुरङ्गकुंजरघटा घण्टाधनर्जयरवैर्विचित्रागमनोत्सवे दिग्वला

क्षान्तिं भजन्ति क्षणात् ॥ ११ ॥ कन्यामीनवृषालिभे यदि खगाः सिंहासनः कीर्त्तितः किंवा चापवृयुग्मकुंभ हरिभे

खेटो हि सिंहासनः । यः सिंहासनयोगजो हि मनुजो भूपाधिराजोबली गर्जत्कुंजरवाजिराजिमकुटारूढो


धरामण्डले ॥ १२ ॥ अजे सिंहे कन्याकलशमिथुनान्त्यालितुरगे समाजः खेटानामिह भवति जन्मन्यपि नरः ।



चतुष्चक्रे योगे सकलसुखभोगेन मिलितो महीपानामालीमुकुटमणिपाली विजयते ॥ १३ ॥ एकैकेन खगेन जन्मस
मयं सैकावली कीर्त्तिता मुक्तालीव समस्तभूपमुकुटालङ्कारचूडामणिः। तज्जातो रिपुपुंजभंजनकरो गंधर्वदिव्याङ्ग
नावृन्दानन्दपरो गुणव्रजधरो विद्याकरो मानवः ॥ १४ ॥ कुलीरे कन्यायामनिमिषधनुर्य्युग्मभवने जनुःकालेयस्य
प्रभवति नभोगो रविमुखः। प्रचण्डप्रोत्तुङ्गप्रबलरिपुहन्ता क्षितिपतिः समन्तादाधिक्यं व्रजति धनदानेन महताम्
॥ १५ ॥ अथादित्यः सिंहे विधुरपि कुलीरे रविसुतो मृगे मीने जीवो हिमकरसुतो यस्य मिथुने। तुलायां शुक्र
स्वेदजभवनगो भूमितनयो नृबालो भूपालो नृपमुकुटभूषामणिवरः ॥ १६ ॥ दिवानाथः सिंहे गवि हिमकरो मेष
भवने महीजः कन्यायाममृतकरसूनुः सुरगुरुः। भवेच्चापे कुंभे दिनमणिसुतस्तोलिनि कविर्ज्जनुः काले यस्य प्रभव
ति नरोऽसौ क्षितिपतिः ॥ १७ ॥ बली पुण्यस्वामी दशमभवनाधीशभवने तपःस्थाम्यागारे भवति दशमेशोऽपिभवि
नाम्। तदागर्ज्जद्दन्तावलनिकरघण्टाघनरवै र्द्दिगन्तं वित्रस्ता विजयगमने यान्त्यरिगणाः ॥ १८ ॥ यदा पुण्यस्वा
मी दशमभवने पुण्यभवने बली कर्म्माधीशो भवति भविनामेव जनने। समुद्रांतं कीर्त्तिर्विजयगमने वैरिपटलीधनु
र्जैत्राटङ्कारैर्भजति चकिताभीतिपदवीम् ॥ १९ ॥ भवेदङ्गाधीशो जननसमये पुण्यभवने तथाकर्म्मस्वामी भवति च

विलग्ने जनिमताम् । तदा गर्ज्जद्दन्तावलकरभवाजिव्रजपदैः समाक्रान्ता पृथ्वी व्रजति गमने मोदपदवीम् ॥ २० ॥
यदा राजस्वामी नवमसुतकेन्द्रार्थभवने बलाक्रान्तो यस्य प्रभवति स वीरो नरवरः । सदा काव्यालापी नवमणिकला
पी बहुबलो तुरङ्गालोदन्तावलकलभगन्ता धनपतिः ॥ २१ ॥ यदा कर्म्मस्वामी सुतभवनगामी शुभयुतः सुतेशः को
दण्डे भवति भविनो यस्य जनने । भयातीतो भोगी भवति चिरजीवी बहुगुणी मतङ्गालीगन्ता रिपुनिकरहन्ता नर
पतिः॥ २२ ॥ धनागारस्वामी भवति यदि पारावतपदे विशालं भूपालं कलयति हवालं बहुबलम् । अरातीभव्रा
ताङ्कशर्मनिश्रमानन्दनिरतं.नितांतं श्रीमंतं विविधधनदानोद्यतमलम् ॥ २३ ॥ देवलोकलवगोनिशाकरात्युपग
राशिपतिरिन्दकांतिभाक् । गोगजव्रजतुरङ्गमण्डलीमण्डितो मणिगणोरिलापतिः ॥ २४ ॥ यदा माने याने
भवति मदने वासवगुरौ स्वतुङ्गे वा पङ्केरुहनिकरबन्धावपि भृशम् । भयत्राता दाता निगमविहिताचारचतुरो
गुणव्रातैर्नम्रो धनपतिसमानो विजयते॥ २५ ॥ एतेषु योगेषु नरो नृपालो भवेदलं नीचकुलप्रजातः । नृपा
लबालोपि च वक्ष्यमाणैः सुयोगजातैरितिसं प्रवक्ष्ये ॥ २६ ॥ अथ सामान्यराजयोगाः ॥ मृगे विलग्ने रविजे कुलीरे
दिवाकरे चन्द्रयुते प्रवृत्तौ । कुम्भे यदाये भृगुजेऽष्टमस्थे भवेन्नृपालो नृपवंशजातः ॥ २७ ॥ यदा कवीजौ भवनस्थ


तुर्ये नृपालवालोपि च भूमिपालः । कुलीरगो देवगुरुः सचन्द्रो नृपालवालं प्रकरोति वालम् ॥ २८ । यदेन्द्र मन्त्री विधुजं प्रपश्येद्गुणाढ्यविज्ञं नृपतिं करोति। प्रसूतिकाले यदि पंचमांशे चैकोपि वालं कुरुते नृपालम् ॥ २९ ॥ स्थितलवे तपनो विधुने स्थितो नृपसुतं कुरुते च नृपोत्तमम् । विधुसुतः सविधुः कुरुते नृपं भवति तुङ्गगतो यदि जन्मनि ॥ ३० ॥ जननलग्नगतो यदिलग्नपो बलयुतः किलकण्टकगो पिवा । अविरजं प्रकरोति तदा नृपं नृपज मेव नचित्रमिति स्फुटम् ॥ ३१ ॥ रविरजे शनिना वलिना युतो भवति भूमिपतिं कुरुते शिशुम् । द्रविड़केरलदे शसमुद्भवं क्षितिवरं च परत्र धनेश्वरम् ॥ ३२ ॥ गुरुकवी यदि तुङ्गगताविमौ जनुषि 'कण्टककोणगृहाश्रितौ। नृप कुले कुरुतो नृपमन्यथा द्रविणपं परितो भवतो नरम् ॥ ३३ ॥ प्रसूतिकाले यदि सर्व्व खेटैस्तनुव्ययागार्थ गृहस्थितै श्चेत्। पुरातनाः पुण्यत एव पुंसां श्रीक्षत्रयोगं प्रवदन्ति सन्तः ॥ ३४ ॥ यदा जीवो लग्ने मकरमपहायप्रवसति तदाल भूपालं नृपतिकुलवालं जनयति । भवत्येवं चन्द्रो जनुषि जनुरङ्गं च कलया परिक्रान्तः केन्द्रे नरपति सुतं भूपतिवरम् ॥ ३५ ॥ सुखागारस्वामी भवति नवमे वायदशमे सुखे वा लग्ने वा स्थितलवगतो वा शुभखगैः । युतो दृष्टो दन्तावलतुरगयानेन नितरां जनानामागारं'कनकमणिसंघैः परिवृतम् ॥ ३६ ॥ पंचमे भवति कर्म्मा



भावपे कान्तिभाजिगजवाजिजं सुखम् । सर्वतोऽस्य विभुता तता भवेदादिगन्तमतुला यशोलता ॥ ३७ ॥ अथ
चन्द्रयोगाः ॥ भवति चन्द्रमसो दशमाधिपो जनुषि केन्द्रनवद्विसुतोपगः । अतिविचित्रमणिव्रजमण्डितो वसुमतीव
सुभूषणसंयुतः ॥ ३८ ॥ चन्द्राक्रान्तभपः सुखालयगतो दन्तावलानां सुखं मुक्तास्वर्णमणिव्रजामलयशःपुंजं विधि
त्रालयम् । भृत्यापत्यकलत्रमित्रपटलीविद्याविनोदं तथा पुण्यं सन्तनुते मुदं नरपतेरर्थं नराणामिह ॥ ३९ ॥
अथानफासुनफादुरधुरायोगाः ॥ व्ययगतैरनफारविवर्ज्जितैर्द्धनगतैः खचरैः सुनफा विधोः । उभयतोपि गतैरुदि
ता नृणां दुरधुरा मधुराशनभोगदा ॥ ४० ॥ अनफायोगफलम् ॥ जनिवतामनफा कुरुतेतरां गुणवतीयुवतीरति
वर्द्धनम् । नृपसभापटुताममलं यशो वरपशोरपि सौख्यमरंपरम् ॥ ४१ ॥ अथ सुनफायोगफलम् ॥ भुजबलेन रमा
परमालयं जनिवतां गरिमा सुनफा यदा । अवलयामलया नवयानभूविभुतयाद्भुतया परमं सुखम् ॥ ४२ ॥ अथ
दुरधुरायोगफलम् । दुरधुरा बहुधावसुधावसुव्रजसुवारणवाजिसुखं नृणाम् । वितनुते नृपतेरतुलं यशो गुणकला
पपटुत्वमिहाद्भुतम् ॥ ४३ ॥ अथ दरिद्रयोगाः ॥ तत्रादौ केमद्रुमयोगः ॥ न धने न व्यये खेटाः चन्द्रादिह भवन्ति
चेत् । तदा केमद्रुमं प्राहुः पण्डितामिहिरादयः ॥ ४४ ॥ केमद्रुमे नरपतेरपि नन्दनोयं देशान्तरं व्रजति पुत्रकल

चहीनः। धर्म्मयुतो विकलितो गदसंघभीतो नानाधितापसहितो महितोषहीनः ॥ ४५ ॥ अथ केमद्रुम भङ्गयोगः । शुक्रेजसौम्यसहितोपि च कण्टकस्थो वा पूर्णविम्ब इह यस्य भवेन्मृगाङ्कः ॥ केन्द्राणि खेचरयुतानि तदा नराणां केमद्रुमोद्भवफलं विफलत्वमीयात् ॥ ४६ ॥ रुद्रयोगः ॥ जनुषि नीचगताः सकला ग्रहा यदि भवन्ति तदा रुद्रसंज्ञकः । रुद्रभवो विकलो विभवोनितो रिपुहतो नितरां शठतायुतः ॥ ४७ ॥ अथफणियोगः ॥ घट गते तपनेक्रियगे शनावलिगते च विधौ निजनीचभे । भृगुसुते जनने फणिसंज्ञको विकलितं कुरुते नरपुङ्गवम् ॥ ४८ ॥ अथ काकयोगः । अजगते भृगुजे रविजे जनुर्ऋषभगे दिनपेऽनिमिषे विधौ । अवनिजे यदि कर्कटगेहगे भवति काकभवो विभवोनितः ॥ ४९ ॥ अथान्यः ॥ विधुयुतो घटभे दिवसाधिपो गुरुमहीजकवीनसुताःपुनः । यदि भवन्ति च नीचगताजनुर्व्रजति राजसुतोपि दरिद्रताम् ॥ ५० ॥ अथ हुताशनयोगः ॥ शनिमहीजनिशाकर चन्द्रजा यदि जनुः किल नीचमुपाश्रिताः । मकरभे भृगुजोपि हुताशनःपरमतापकरोनकरोति शम् ॥ ५१ ॥ यदि भवन्ति नवायदशाधिपा जनुषि नीचगताःविकला भृशम् । नृपति योगजमङ्गभृतां फलं परिणमत्यपि निष्फलतामिह ॥ ५२ ॥ रिपुमन्दिरगैरेव वैरिभागगतैरपि । राजयोगा विनश्यन्ति दिवाकरकरोपगैः ॥ ५३ ॥

भवति वीक्षणवर्जितमङ्गिनां जननलग्नमिहाम्बरगामिनाम् । जननभं च नृपालभवो नरो जगति यातितरामतिर
ङ्कताम् ॥ ५४ ॥ भद्रायां व्यतिपाते वा तथा केतूदये जनिः । यस्य तस्य विनश्यन्ति राजयोगफलान्यपि ॥ ५५ ॥
परमनीचलवे यदि चन्द्रमा भवति जन्मनि तस्य विशेषतः । नृपतियोगफलं विफलं तदा कलयतीति वदन्ति मुनी
श्वराः ॥ ५६ ॥ इति जीवनाथदैवज्ञविरचिते भावकुतूहले राजयोगदरिद्रयोगाध्यायः ॥ शुभमस्तुतराम् ॥
श्रीरस्तु ॥ अथ सामुद्रिकाध्यायः ॥ जनने प्रबलो यस्य राजयोगो भवेद्यदि । करे वा चरणेऽवश्यं राजचिह्नं प्रजा
यते ॥ १ ॥ अनामामूलगा रेखा सैव पुण्याभिधा मता । मध्यमाङ्गुलिमारभ्य मणिबन्धान्तमागता ॥ २ ॥ सोर्द्ध्वरेखा
विशेषेण राजलाभकरी भवेत् खण्डिता दुष्टफलदा क्षीणा क्षीणफला मता ॥ ३ ॥ अङ्गुष्ठमध्ये पुरुषस्य यस्य
विराजते चारुयवो यशस्वी । स्ववंशभूषास्स्थितो विभूषायोषाजनैश्वर्यगणैश्च मर्त्यः ॥ ४ ॥ वैसारिणो वातपवारणो
वा चेद्वारणो दक्षिणपाणिमध्ये । सरोवरं चाङ्कुश एव यस्य वीणा च राजा भुवि जायते सः ॥ ५ ॥ मुकुरशैलकृपाण
हलाङ्कितं करतलं किल यस्य सवित्तपः । कुसुममालिकया फलमीदृशं नृपतिरेव नृपालभुवो यदा ॥ ६ ॥ करतलेपि
च पादतले नृणां तुरगपङ्कजचापरथाङ्कवत् । ध्वजरथासनदोलिकया समं भवति लक्ष्म रमापरमालये ॥ ७ ॥ कुंभस्तं




भा॰ क॰
९

भो वा सुरक्तो मृदवः पाणावंघ्रौ बाहुमो यस्य पुंसः। संपद्दृष्टोऽखण्डलक्ष्मापरीतः किम्वा सोयं प्रण्डितः शैाखि
कोवा ॥ ८ ॥ विशालभालोऽम्बुजपत्रनेत्रः सुवृत्तमैालिः क्षितिमण्डले यः। आजानुबाहुः पुरुषं तमाहुः क्षोणी
भृतां मुख्यतरं महान्तः ॥ ९ ॥ नाभिर्गभीरा सरला च नासा वक्षस्थलं रक्तशिलातलाभम्। आरक्तवर्णौ खलु यस्य
पादौ मृदू भवेतां स नृपोत्तमः स्यात् ॥ १० ॥ राजते करगो यस्य मिलोऽतुलधनप्रदः। तथा पादतले पुंसां वाह
नार्थसुखप्रदः ॥ ११ ॥ राजवंशप्रजातानां समस्तं फलमीदृशम् । अन्येषामल्पतां याति तथाऽव्यक्तं सुलक्ष
णम् ॥ १२ ॥ इति भावकुतूहले सामुद्रिकाध्यायः ॥ ॰ ॥ अथ स्त्रीजातकाध्यायः ॥ शुभाशुभं पूर्व्वजनेर्वि
पाकात्सीमन्तिनीनामपि यत्फलं हि। विवाहकालात्परतः प्रवीणैरसंभवात्तत्पतिषु प्रकल्प्यम् ॥ १ ॥ यतीव
सारं फलमङ्गनानामुदीरितं शैानकनारदाद्यैः। व्यक्तं यथालग्नविशाकराभ्यां मया तथैव प्रतिपाद्यते तत् ॥ २ ॥
सैाभाग्यं सप्तमस्थाने शरीरं लग्नचन्द्रयोः । वैधव्यं निधनस्थाने पुत्रे पुत्रं विचिन्तयेत् ॥ ३ ॥ सैाम्याभ्यां प्रवरा
शुभत्रययुते जाया भवेद्भूपतेः सैाम्यैकेन पतिप्रिया मदनभे दृष्टे युते जन्मनि । पापैकेन पुनर्विलोलनयना पा
पद्वयेनाधमा पापानां त्रितयेन सा परकुलं हत्वा पतिं गच्छति ॥ ४ ॥ अन्तःकाले यस्या मदनभवने वासरमणौ पतिं




त्यक्त्वा नूनं कुपितहृदया भूमितनये । अवश्यं वैधव्यं सपदि कमलाक्षी रविसुते जरां पापैर्दृष्टे निजपतिविरोधं व्रज
ति वा ॥ ५ ॥ यस्याः शशाङ्के जनि लग्नभे वा समर्क्षगे सा प्रकृतिस्थिरा स्यात् । शुभेक्षिते रूपवती गुणाढ्या पतिप्रिया
चारुविभूषणाढ्या ॥ ६ ॥ यदाङ्कचन्द्रावसमे भवेतां तदा नराकारसमाकृरूपा । पापेक्षितौ पापयुतौ विशेषा
द्दुराचरा रूपगुणैर्विहीना ॥ ७ ॥ अथ स्त्रीणां राजयोगाः ॥ जनुःकाले यस्या मदनसदने दानवगुरौ शुभाभ्या
माक्रान्ते गतवति तदा सा विधुमुखी । गजेन्द्राणां मुक्ताफलविमलमालावृतकुचा प्रिया पत्युर्नित्यं प्रभवति शचीव
क्षितितले ॥ ८ ॥ समाक्रान्ते लग्ने त्रिदशगुरुणा वाथ भृगुणा बुधे कन्याराशौ मदनभवने भूमितनये । मृगेकर्क्ये
चन्द्रे सति भवति लावण्यलतिकातपोरेखा योषा प्रभवति विशेषात् क्षितिपतेः ॥ ९ ॥ शशाङ्के कर्कस्थे भवति हि युव
त्यां विधुसुते तनौ जीवे मीने गवि भृगुसुते जन्मसमये । सहस्राक्षीमान्या जगति नृपकन्या गुणवती विशेषा देवाख्या
नृपतिपत्निका पुण्यरतिलका ॥ १० ॥ अथ सप्तमे प्रत्येकग्रहफलम् ॥ दिनपताविह कामनिकेतनं गतवति प्रवराप्य
वरा भवेत् । जनुषि वल्लभभावविवर्जिता सुजनतारहिता वनिता भृशम् ॥ ११ ॥ वृषे, राकानाथे भवति मदने
जन्मसमये भवेद्देषा योषा विमलवसना, चारुवदना । विनम्रा मुक्तालीवलितकुचभारेण नितरां परा लीलालक्ष्मीरति




पतिरमेव क्षितितले ॥ १२ ॥ अङ्गारके मदनमन्दिरमिन्दुभावं मन्दान्विते हरिभगे जननेऽङ्गनायाः । वैधव्यमेत्य नियतं कपटप्रगल्भाद्वाराङ्गना भवति सैव वराङ्गनापि ॥ १३ ॥ अनेकस्त्रीभर्त्ता भवति मखकर्त्ता च मदने बुधे तुङ्गे यस्या जनुषि खलु तस्याः पतिरिह । स्वयं वामा कामाकुलितहृदयामोदकलया परीता मुक्तालीरजतकनकस्त्री मणिगणैः ॥ १४ ॥ परिक्रान्ते यस्या मदनभवने देवगुरुणा गुणज्ञा धर्म्मज्ञा निजपति पदाब्जं भजति सा । मणीनां मालाभिः कनकघटिताभिश्च शिरसा समाक्रान्ता कान्ता रतिपतिपताकेव शशिभे ॥ १५ ॥ कवौ यस्या जन्मन्यपि मदनगे मीनभवने तदा कान्तो दान्तो रतिपतिकलाकौतुकपटुः । धनुर्द्धर्त्ता भर्त्ता स्वयमपि च सङ्गीतरसिका विलोलापद्माक्षी वसनलसिता भूषणवृता ॥ १६ ॥ मदनभावगते तपनात्मजे पतिरतीव गदाकुलितो भवेत् । मलिनवेषधरो विकलो मदाज्जनुषि तुङ्गगते प्रवरो धनी ॥ १७ ॥ सप्तमे सिंहिकापुत्रे कुलदोषविवर्द्धिनी । नारी सुखपरित्यक्ता तुङ्गे स्वामिसुखान्विता ॥ १८ ॥ अथान्ययोगाः ॥ मिथस्तौ शुक्रार्कौ यदि लवगतौ वीक्षणमितौ भवेतां वा लग्ने घटलवगते शुक्रभवने । अनङ्गैराखोलाकलितनररूपाभिरनिशं स्थिताभिः कान्ताभिः खलु मदनशान्तिं व्रजति सा ॥ १९ ॥ त्रपानाथे यस्या गतवति कुलीराङ्गमथवा मदागारं सारं सुरगुरुबुधाभ्यामपि यु




तम् । महान्तोपि भ्रान्ताः कति कति मनोजाधिकतया पुरस्तां पश्यन्तो दधति परमानन्दलहरीम् ॥ २० ॥ मृगागा
रे सारे गतवति विसारं सुरगुरौ कवौ वा पातालं तपनतनयेनापि मिलिते । जनुःकाले यस्याः करिमुकुटमुक्ताफल
मणिव्रजानां मालाभिर्वलितमुत वक्षोजयुगलम् ॥ २१ ॥ अथ वैधव्ययोगाः ॥ निशाकरात्सप्तमभावसंस्था मही
जमन्दागुदिवाकराश्चेत् । तनोरिमे जन्मनि नैधने वा दिशन्ति वैधव्यमलं महेवा ॥ २२ ॥ लग्नाधिपो वाथ मदालये
शो वर्गो गतः पापनभश्चराणाम् । मदे तनौ वा खलखेटवर्गास्तदा कुलं मुंचति चंचलाक्षी ॥ २३ ॥ पापान्तराले यदि
लग्नचन्द्रौ स्यातां शुभालोकनवर्ज्जितौ तौ । अनङ्गलोला खलसङ्गमेन कुलद्वयं हन्ति तदा मृगाक्षी ॥ २४ ॥ व्ययेऽष्टमे
भूमिसुतस्य राशावर्गो सपापे भवतीह रण्डा । मदे कुलीरे सरवौ कुजेपि धवेन हीनारम तेऽन्यलोकैः ॥ २५ ॥ तनौ
चतुर्थे निधने व्यये वा मदालये पापयुतः कुजश्चेत् । अनङ्गलीलां प्रकरोति जारैः पतिं तिरस्कृत्य विलोलनेत्रा
॥ २६ ॥ परस्परांशोपगतौ भवेतां महीजशुक्रौ जननेऽङ्गनायाः । स्वयं मृगाक्षीत्यभिसारिकेव प्रयाति कामाकुलि
तान्यगेहम् ॥ २७ ॥ पापग्रहे सप्तमगे बलोने शुभेन दृष्टे पतिसौख्यहीना । स्यातां मदे भौमकवी सचन्द्रौ पत्याज्ञया
साव्यभिचारिणी स्यात् ॥ २८ ॥ पापग्रहे सप्तमलग्नगेहे भर्त्ता दिवं गच्छति सप्तमाब्दे । निशाकरे चाष्टमवैरिभावे



तदाष्टमाब्दे निधनं प्रयाति ॥ २९ ॥ सप्तमेशोऽष्टमे यस्याः सप्तमे निधनाधिपः । पापेक्षणयुतो बाला वैधव्यं च भजते ध्रुवम् ॥ ३० ॥ सप्ताष्टमपती षष्ठे व्यये वा पापपीडितौ । तदा वैधव्यमाप्नोति नारी नैवात्र संशयः ॥ ३१ ॥ मन्दारराशौ सविते शशाङ्के खलचिते लग्नगते सशास्त्री । माता सहैव व्यभिचारिणी स्यान्मन्दे कुजांशे व्रणविद्धयोनिः ॥ ३२ ॥ अथ कुजराशौ प्रत्येकत्रिंशांशफलम् ॥ यदाङ्गचन्द्रौ कुजभे कुजस्य त्रिंशांशके दुष्टतमैव कन्या । मन्दस्य दासी हि गुरोस्तु साध्वी मायाविनी ज्ञस्य कवेः कुदृष्टा ॥ ३३ ॥ अथ शुक्रराशौ । शुक्रभे कुजखांशे दुष्टा सौरेः पुनर्भवा । गुरोर्गुणमयी विज्ञा ज्ञस्य ख्याता गुणैर्भृगोः ॥ ३४ ॥ अथ बुधस्य ॥ बुधभे भूमिपुत्रस्य कापटी क्लीववच्छनेः । गुरोः सती विदोविज्ञा कवेः कामातुरा भवेत् ॥ ३५ ॥ अथ चन्द्रभे ॥ कुलीरभे भूमिसुतस्य वेश्या शनेः पतिघ्नाथ विघातकर्त्री । गुरोर्गुणान्वती बुधस्य शिल्पक्रियाज्ञा कुलटा भृगोः स्यात् ॥ ३६ ॥ अथ सिंहभे ॥ सिंहेन राकारधरा कुजस्य वराङ्गना भानुसुतस्य नारी । गुरोर्विला धीशवधूर्बुधस्य दुष्टा कवेरङ्गजगामिनी स्यात् ॥ ३७ ॥ अथ गुरुभे ॥ गुणैर्विभिन्ना गुरुभे कुजस्य मन्दस्य मन्दा गुणतत्त्वविज्ञा । जीवस्य विज्ञा शशिनन्दनस्य शुक्रस्य रम्यापि भवेदरम्या ॥ ३८ ॥ अथ शनिराशौ ॥ मन्दालये भूमिसुतस्य दासी शनेरसाध्वी भवतीति साध्वी । गुरोस्त्रिंशगानाथ




सुतस्य दृष्टा शुक्रस्य चञ्चला कामतः प्रदिष्टा ॥ ३९ ॥ अथान्ययोगाः । मन्दे मध्यबले कवीन्दु शशिजैर्वीर्य्यंयुतैः प्राय
शः शेषैर्वीर्य्यसमन्वितैः पुरुषवच्चारी यदोजे तनुः । जीवाङ्गाररवीन्दुजैर्बलयुतैस्स्वे दृक्कराशौ समे गीतातत्त्वविचा
रचारचतुरा वेदान्तवादिन्यपि ॥ ४० ॥ यदाष्टमे देवगुरौ भगा वा विनष्टगर्भा मृतपुत्रका वा । कुजेष्टमे सा कुलटा मृ
गाक्षी चन्द्रेऽष्टमे स्वामिसुखेन हीना ॥ ४१ ॥ मन्देष्टमे रोगरतस्य भार्य्या दिनाधिपे सापरितापतप्ता ॥ अनङ्गरङ्गा
परकान्तसक्ता मृतावगौ सा कुलधर्म्मभक्ता ॥ ४२ ॥ अथ स्त्रीणां पुत्रभावविचारः ॥ पंचमे शुभसंदृष्टे पंचमाधिपता
वपि । केन्द्रे कोणे तदा नारी बहुपुत्रवती भवेत् ॥ ४३ ॥ पंचपुत्रवती जीवे सबले च स्थिते विधौ । सुतासुखव
ती पापे नारी सन्मानवर्जिता ॥ ४४ ॥ अथ विषयोगः ॥ भद्रासार्पानलजलदृशाभे भानुमन्दारवारे यस्या जन्म प्रभव
ति तदा साविषाख्या कुमारी । पापे लग्ने शुभखगयुतः पापखेटावरिस्थौ स्यातां यस्या जननसमये सा कुमारी
विषाख्या ॥ ४५ ॥ आदित्यसूनोर्हिवसे द्वितीया भुजङ्गभे भौमदिनेऽम्बुपर्क्षं । चेत्सप्तमी वाथ रवौ विशाखा रुद्रे
स्थितौ वापि च सा विषाख्या ॥ ४६ ॥ धर्म्मगेस्तगते भौमे लग्नगे रविनन्दने । पंचमे दिवसाधीशे सा विषाख्या कु
मारिका ॥ ४७ ॥ विषाख्या शोकसन्तप्ता दुर्भगा मृतपुत्रिका । वस्त्राभरणहीना च पुराणैरुदिता बुधैः ॥ ४८ ।



अथ विषयोगभङ्गः ॥ सप्तमे सप्तमाधीशः शुभो वा लग्नचन्द्रयोः ॥ विषयोगमलं हन्ति सद्योहरिरिभं यथा ॥ ४९ ॥ इत्थं विवाहकालेपि ज्ञातव्यं लग्नचन्द्रयोः । तदधीनं यतः स्त्रीणां शुभाशुभफलं भवेत् ॥ ५० ॥ अथ वैधव्यभङ्गो पायः ॥ वैधव्ययोगयुक्तायाः कन्यायाः शान्तिपूर्व्वकम् । वेदोक्तविधिनोद्वाहं कारयेच्चिरजीविना ॥ ५१ ॥ इति भावकुतूहले स्त्रीजातकाध्यायः ॥ अथ कन्यायाः शुभाशुभाङ्गलक्षणाध्यायः ॥ शुभलक्षणसंपन्ना भवेदिह यदाऽ ङ्गना । तत्करग्रहणादेव वर्द्धते गृहिणां सुखम् ॥ १ ॥ शुभाशुभं पुरागीतं वेदव्यासेन धीमता । प्रकाश्यते त देवाद्य नारीणामङ्गलक्षणम् ॥ २ ॥ युवतिपादतलं किल कोमलं सममतीव जपाकुसुमप्रभम् । दिशति मांसल मुर्व्वमिलापतेरतिहितं बहुधर्म्मविवर्जितम् ॥ ३ ॥ कमलकंबुरथध्वजचक्रवत्पृथुलमीनविमानवितानवत् । भव ति लक्ष्म पदे यदि योषितां क्षितिभृतां वनिता विभुताष्टताः ॥ ४ ॥ शूर्पाकारं विवर्णं च विशुष्कं परुषं तथा । रूक्षं पादतलं तन्वा दौर्भाग्यपरिसूचकम् ॥५॥ यस्याः समुन्नताङ्गुष्ठो वर्त्तुलोऽतुलसौख्यदः । शूर्पाकारा नखा यस्याः सा भवेद्दुःखभागिनी ॥ ६ ॥ संचलन्त्या धराधूलिधारा यदा राजमार्ग्गेऽवलाया वलादुच्छलेत् । पांशुला सा कुला नां चयं सत्वरं नाशयित्वा खलैर्म्मोदते सर्व्वदा ॥ ७ ॥ यस्या अन्योन्यमारूढाः पादाङ्गुल्यो भवन्ति चेत । साप



त्यन्यकुधा हत्वा वारवामा भवेदिह ॥ ८ ॥ कनिष्ठा मस्पृशेद्भूमिं चलन्तरा योषितस्तदा। साद्भुतं स्वपतिं हत्वा जा रेण रमते पुनः ॥ ९ ॥ अनामिका च मध्या च यदि भूमिं न संस्पृशेत्। आद्या पतिद्वयं हन्ति चापरा तु पतित्रयम् ॥ १० ॥ अनामिका च मध्या च यदि हीना प्रजायते। तदा सा पतिहीना स्यादित्याह भगवान्स्वयम् ॥ ११ ॥ यदि पादनखाः स्निग्धा वर्त्तुलाश्च समुन्नताः। ताम्रवर्णा मृगाक्षीणां महाभोगप्रदायकाः। १२ ॥ यदि भवेदमलं किल कोमलं कमलपृष्ठवदेव मृगीदृशाम्। अरुणकुंकुमबिंद्रुमसन्निभं नकु शुभं पदपृष्ठमिति ध्रुवम् ॥ १३ ॥ अंघ्रिमध्ये दरिद्रा स्यान्नम्रत्वेन सदाङ्गना। शिरालेनाध्वगा नारी दासी लोमाधिकेन सा। २४ ॥ निर्मांसेन सदा नारी दुर्भगा खलु जायते। गुल्फौ गूढौ शुभौ स्यातामशिरालौ च वर्त्तुलौ ॥ १५ ॥ अगूढौ शि थिलौ यस्यास्तस्या दौर्भाग्यसूचकौ। गुल्फलक्षणमाख्यातं पार्ष्णिलक्षणमुच्यते ॥ १६ ॥ समानपार्ष्णिः सुभगा पृथुपार्ष्णिश्च दुर्भगा। कुलटा तुङ्गपार्ष्णिस्स्यात् दीर्घपार्ष्णिर्गदाकुला ॥ १७ ॥ जंघे रंभोपमे यस्या रोमहीने च वर्त्तुले। मांसले च समे स्निग्धे राज्ञी सा भवति ध्रुवम् ॥ १८ ॥ एकरोमा प्रिया राज्ञो द्विरोमा सौख्य भागिनी। त्रिरोमा विधवा ज्ञेया रोमकूपेषु कामिनी ॥ १९ ॥ भवति जानुयुगं यदि मांसलं तदति




हृन्नमतीव शुभप्रदम् । भवनभर्त्तुरतो विपरीतमादिभिरिदं विपरीतमुदीरितम् ॥ २० ॥ समुन्नतनितम्बा
ढ्या यस्याः सिद्धाङ्कुला कटिः । सा राजपट्टमहिषी नानास्त्रीभिः समावृता ॥ २१ ॥ निर्म्मांसा विनता
दीर्घा चिपिटा सकटाकृतिः । लघ्वी रोमाकुला नार्य्या वैधव्यं दिशते कटिः ॥ २२ ॥ सीमन्तिनीनां यदि चारु
बिम्बो भवेन्नितम्बो बहुभोगदः स्यात् । समुन्नतो मांसल एव यासां पृथुः सदा कामसुखाय तासाम् ॥ २३ ॥
यदा गजस्कन्धसमानरूपो भगो यदा कच्छपपृष्ठवेषः । इलापतेः कामविमोददायी वामोन्नतः सो
पि सुता जनेता ॥ २४ ॥ दक्षोन्नतः पुत्रसुखप्रदः स्यादित्याकुरार्य्या नियतं कुमार्य्याः । तुङ्गः पृथुः संहत
एव यस्या यदाखुरोमामलपद्म रूपः ॥ २५ ॥ अश्वत्थदलरूपो वा भगो गूढमणिः शुभः । चुल्लिकोदर
रूपो यः कुरङ्गखुरसन्निभः ॥ २६ ॥ रोमाकुलो दृष्टनासो विकृतास्यो महाधमः । कामिनां न विनोदा द्वौ
भगो भवति सर्वथा ॥ २७ ॥ कामिन्याः कंचुकावर्त्तो भगो दौर्भाग्यवर्द्धकः । सगर्भधारणासक्तो वक्राका
रोपि तादृशः ॥ २८ ॥ वेतसवंशदलप्रतिभासः कर्प्पररूपवदेव भगो वा । लम्बगलो विकटो गजलो
मा नैव शुभश्चिपिटोपि निकृष्टः ॥ २९ ॥ मृदुतरं मृदुलोमकलाकुलं यदि तदा अधमं भगभाजनम् ।



न्नत समुन्नतमायतमादरा द्युतिकलाकलितं गदितं बुधैः ॥ ३० ॥ तदेव दक्षिणावर्त्तं मांसलं शुभसूच
कम् । वामावर्त्तं च नारीणां खण्डितं खण्डिताश्रयम् ॥ ३१ ॥ निर्म्मांसं कुटिलाकारं ह्रस्वं वैधव्यसूच
कम् । अतिस्थूलं महादीर्घं सद्योदौर्भाग्यवर्द्धकम् ॥ ३२ ॥ मृदुला विपुला वस्तिः शोभना च समुन्नता । अशु
भा रेखयाक्रान्ता शिराला लोमसंकुला ॥ ३३ ॥ गभीरा दक्षिणावर्त्ता नाभी भोगविवर्द्धिनी । व्यक्तग्रन्थिः
समुत्ताना वामावर्त्ता न शोभना ॥ ३४ ॥ पृथूदरी यदा नारी सूते पुत्रान्बहूनपि । भेकोदरी नरेशानं बलिनं वा
यतोदरी ॥ ३५ ॥ उन्नतेनोदरेणैव बन्ध्या नारी प्रजायते । जठरेण कठोरेण साभवेद्भिन्दुकाङ्गना ॥ ३६ ॥ आव
र्त्तनयुतेनैव दासिका भवति ध्रुवम् । कोमलैर्मांससंयुक्तैः समानैः पार्श्वकैः शुभम् ॥ ३७ ॥ विशिरेण मृदु
त्वचा सपुत्रा जठरेणातिक्रमेण कामिनी सा । बहुधा तुलभोगलालितानुदिनं मोदकसत्फलाशिनी स्यात्
॥ ३८ ॥ घटाकारं यस्या भवति च मृदङ्गे न सदृशं यवाकारं दैवादुदरमहितं पुत्ररहितम् । अभ
द्रं नो भद्रं तदपि यदि कूष्माण्डसदृशं निरुक्तं तत्त्वज्ञैः कठिनमुरशालेन च समम् ॥ ३९ ॥ कृशतरा त्रि
वली सरलावली ललितनर्म्मविनोदविवर्द्धिनी । भवति सा कपिला कुटिला किलाशुभकरी विरला मसृ

दाकृतिः ॥ ४० ॥ लोमहीनहृदयं यदा भवेन्निम्नताविरहितं समायतम् । भोगमेत्य सकलं वराङ्गना सा पुनः प्रियवियोगमालभेत् ॥ ४१ ॥ उद्भिन्नरोमहृदया स्वपतिं निहन्ति विस्ताररूपहृदया व्यभिचारिणी स्यात् । अष्टादशाङ्गुलमितं हृदयं सुखाय चेद्रोमशं च विषमं न सुखाय किंचित् ॥ ४२ ॥ उन्नतं पीवरं शस्तं हृदयं वरयोषिताम् । अपीवरमिदं नीचं पृथु दौर्भाग्यसूचकम् ॥ ४३ ॥ भवत एव समौ सुदृढाविमौ यदि घनौ सुदृशस्तु पयोधरौ । निजपतेरनिशं परिवर्त्तुलौ कुसुमबाणविनोदविवर्द्धकौ ॥ ४४ ॥ सुभ्रुवो विरलौ स्थूलौ स्थूलाग्रावहिताविमौ । पयोधरौ यदा नार्य्याः प्रभवेद्दक्षिणोन्नतः ॥ ४५ ॥ पुत्रदोऽप्यथ कन्याजो यदा वामोन्नतो भवेत् । सान्तरालौ च विस्तारौ पीवरास्यौ न शोभनौ ॥ ४६ ॥ मूले स्थूलौ क्रमकृशावग्रे तीक्ष्णौ पयोधरौ । सुखदौ पूर्वकाले तु पश्चादत्यन्तदुःखदौ ॥ ४७ ॥ पुत्रिणी विनतस्कन्धा ह्रस्वस्कन्धा सुखप्रदा । पुष्टस्कन्धातु कामान्धा रति भोग सुखावहा ॥ ४८ ॥ मदान्धा कुटिलस्कन्धा स्थूलस्कन्धा च तादृशी । यदि लोमाकुलस्कन्धा वैधव्यं द्रुतमावहेत् ॥ ४९ ॥ सुगूढांसासंहतांसा च धन्या भवति कामिनी । तुङ्गांसा विधवा ज्ञेया विमांसांसा तथैवच ॥ ५० ॥ अङ्गुष्ठाङ्गुलिकं युग्मं यत्पद्मकलिका समम् । बहु भोगाय नारीणां निर्म्मितं विधिना


पुरा ॥ ५१ ॥ करतलं भुजयोर्य्यदि कोमलं विमलपद्मनिभं च समुन्नतम् । निजपतेः कुसुमायुधवर्द्धकं निगदितं मुनिना विधिनोदितम् ॥ ५२ ॥ स्वच्छरेखाकुलं भद्रं नो भद्रं हीनरेखया । अभद्रं रेखया हीनं वैधव्यं चातिरेखया ॥ ५३ ॥ शिरालं कुरुते दुःखं नारीकरतलं यदि । समुन्नतं च विशिरं करपृष्ठं सुशोभनम् ॥ ५४ । रोमाकुलं गभीरं च निर्म्मांसं पतिजीवहृत् । सुभ्रुवः करपृष्ठस्य लक्षणं गदितं बुधैः ॥ ५५ ॥ गभीरा रक्ताभा भवति मृदुला वा स्फुटतरा करे वामे रेखा जनयति मृगाक्षया बहु शुभम् । यदा वृत्ताकारा पतिरतिसुखं विन्दति परं विसारः सौभाग्यं बलमपि सुतं स्वस्तिकमपि ॥ ५६ ॥ करतले यदि पद्मशिलापतेः प्रियतमा परमा गरिमावृता । नृपमपत्यमलं जनयेद्वरं बलवतामपिमानविमर्द्दकम् ॥ ५७ ॥ यदा प्रदक्षिणाकारो नन्द्यावर्त्तः प्रजायते । चक्रवर्त्तिनृपपत्नी सा यस्याः पाणितलेमले ॥ ५८ ॥ श्वातपत्रं च कमठः शंखोपि यदि वा भवेत् । नृपमाता गुणोपेता भव्याकारा पतिव्रता ॥ ५९ ॥ यस्या वा मकरे रेखा तुलामालोपमा भवेत् । वैश्यवामा रमापूर्णा नानालङ्कारमण्डिता ॥ ६० ॥ करतले गजवाजि वृषाकृतिः कृतिविदामबला किल कोविदा । भवति सौधसमा यदि सुभ्रुवोऽशनिनिभातिशुभा किल रेखि



का ॥ ६२ ॥ भवति या विमलाङ्कुशचामरामलशरासनवद्यदि रेखिका । गुणविभूषितभूपतिवल्लभा कर तले शकटेन विशोऽवला ॥ ६२ ॥ अंगुष्ठमूलतो रेखा कनिष्ठां यदि गच्छति । यस्याः सा पतिहन्त्री तां दूरतः परिवर्ज्जयेत् ॥ ६३ ॥ यदि करे करवालगदामलप्रखरकुन्तसदङ्कुरङ्गवत् । भवति शूलनिभा खलु रेखिका भुवि सदा धनदा प्रमदा तदा ॥ ६४ ॥ वृकभेकवृश्चिकभुजङ्गजम्बुकाः खरकंकपन्नगख भा विडालकाः । यदि वामपाणितलगा भवन्ति चेत्कलभेन सार्द्धमतिरोगकारकाः ॥ ६५ ॥ कोमलः शरलांगुष्ठो वर्त्तुलो यदि योषिताम् । क्रमादेव कृशाङ्गुलयो दीर्घाकारास्त्र वर्त्तुला ॥ ६६ ॥ पृष्ठरोमप्रजाः शस्ताश्चिपिटा उदिता बुधैः । कृशाः कुंचितपर्वाणो ह्रस्वा रोगभयावहाः ॥ ६७ ॥ अनेकपर्व संयुक्ता उन्नतांगुलयोऽशुभाः ॥ ६८ ॥ शंखशुक्तिनिभा निम्ना विवर्णा न नखाः शुभाः । कपिला वक्रिता रूक्षाः सुभ्रुवः सुखनाशकाः ॥ ६९ ॥ यदि भवन्ति नखेषु मृगोदृशां सितरुचो विरला यदि बिन्दवः । अतितरां कुसुमायुधपीडया परजनेन नयन्ति रमन्ति ताः ॥ ७० ॥ गुप्तास्थिपृष्ठवंशेन मांसलेन पतिप्रिया । रोमाकुलेन पृष्ठेन विधवा भवति ध्रुवम् ॥ ७१ ॥ सशिरेणातिभुग्नेन विनतेन च दुःखिता । सरलो मांस



लो यस्याः पृष्ठवंशः समुन्नतः । सापत्युरनुभद्राख्या मुक्तालङ्कारमण्डिता ॥ ७२ ॥ अतिप्रिया सुशीला च वराङ्गीभिः समावृता ॥ ७३ ॥ कण्ठोवर्त्तुलरूपः कमनीयः पीनतायुक्तः । चतुरङ्गुलश्च यस्याः सा निजभर्त्तुः प्रिया भवति ॥ ७४ गुप्तास्थिर्म्मांसला ग्रीवा त्रिरेखाभिः समावृता । सुसंहता तदा शस्ता विपरीता न शोभना ॥ ७५ ॥ स्थूलग्रीवा धवत्यक्ता रक्तग्रीवा च दासिका । अपत्या चिपिटग्रीवा लघुग्रीवार्थवर्जिता ॥ ७६ ॥ सुघना कोमला यस्या निर्ल्लोमा च हनुः शुभा । लोमशा कुटिला लघ्वी चातिस्थूला न शोभना ॥ ७७ ॥ मांसलौ कोमलावेतौ कपोलौ वर्त्तुलाकृती । समुन्नतौ मृगाक्षीणां प्रशस्तौ भवतस्सदा ॥ ७८ ॥ निर्म्मांसौ परुषाकारौ रोमशौ कुटिलाकृती । सीमन्तिनीनामशुभौ दौर्भाग्यपरिवर्द्धकौ ॥ ७९ ॥ वर्त्तुलो रेखया क्रान्तो बन्धूकसदृशोऽधरः । स्निग्धो राजप्रियो नित्यं शुभ्रुवः परिकीर्त्तितः ॥ ८० ॥ प्रलंबः परुषाकारः स्फुटितो मांसवर्ज्जितः । दौर्भाग्यजनको ज्ञेयः कृष्णो वैधव्यसूचकः ॥ ८१ ॥ उपर्य्यधः समा दन्ताः स्तोकरूपाः पयोदृपः । द्वात्रिंशद्दास्यगा यस्याः सा सदा सुभगा भवेत् ॥ ८२ । पीताः स्थूलाः कृष्णलाभाः शुक्त्याकारा नतभ्रुवः । रदा यदास्थिता द्वेधा विरला भाग्यनाशकाः ॥ ८३ ॥ अधोदन्ताधिकत्वेन मातृहीना च दुःखि



ता । विधवा विकटाकारैः स्वैरिणी विरलद्विजैः ॥ ८४ ॥ कोमला सरला रक्ता श्वेता च रसना शुभा । स्थूलाग्रा मध्यसंकीर्णा विकृता सुखनाशिनी ॥ ८५ ॥ श्यामया कलहा नित्यं दरिद्रा स्थूलया भवेत् । अभक्ष्यभक्षिणी ज्ञेया जिह्वया लंबमानया ॥ ८६ ॥ तालु कोकनदाभासं कोमलं भद्रकारकम् । नारी प्रव्रजिता पीते सिते वैधव्यमाप्नुयात् ॥ ८७ ॥ श्यामले पुत्रहीना च रूक्षे तालुनि दुःखिता । वक्रे कलिप्रिया नारी बहुरूपे च दुर्भगा ॥ ८८ ॥ क्रमवृत्तारुणा वृत्ताऽस्थूला घण्टी शुभा मता । अतिस्थूला प्रलम्बा च कृष्णा नैव शुभा भवेत् ॥ ८९ ॥ भवति चेदनिमीलितलोचनं शुभदृशां दरफुल्लकपोलकम् । अलमलक्षितदन्तमुदीरितं पतिहितं सततं स्मितमुत्तमम् ॥ ९० ॥ नासिका तु लघुच्छिद्रा समवृत्तपुटा शुभा । स्थूलाग्रा मध्यनम्रा च न शस्ता सुभ्रुवो भवेत् ॥ ९१ ॥ लोहिताग्रा कुंचिता च महा वैधव्यकारिणी । दासिका चिपिटाकारा प्रलंबा च कलिप्रिया ॥ ९२ ॥ रक्तान्ते लोचने भद्रे तदन्तःकृष्णतारके । कंबुगोक्षीरधवले कोमले कृष्णपक्ष्मिणी ॥ ९३ ॥ अल्पायुरुन्नताक्षी च वृत्ताक्षी कुलटा भवेत् । अजाक्षी केकराक्षी च कासराक्षी च दुर्भगा ॥ ९४ ॥ पिङ्गाक्षी च कपोताक्षी दुःशीला कामवर्जिता । कोटराक्षी महादुष्टा रक्ताक्षी पतिघातिनी ॥ ९५ ॥



बिडालाक्षी गजाक्षी च कामिनी कुलनाशिनी । बभ्रुरा च दक्षकायाक्षी पूंश्चली वामकारिका ॥ ९६ ॥
वहुधनवती नारी मधुपिंगललोचना । पुत्रपौत्रसुखोपेता गदिता पतिसंमता ॥ ९७ ॥ कोमलैरवि
नाभासैः पक्ष्मभिः सुघनैरपि । लघुरूपधरैरेव धन्या मान्या पतिप्रिया ॥ ९८ ॥ रोमहीनैश्च विरलैर्लम्बितैः
कपिलैरपि । पक्ष्मभिः स्थूलकेशैश्च कामिनी परगामिनी ॥ ९९ ॥ वर्त्तुला कोमला श्यामा भ्रूर्य्यदा धनुराकृ
तिः । अनङ्गरङ्गजननी विज्ञेया मृदुलोमशा ॥ १०० ॥ पिंगला विरला स्थूला सरला मिलिता यदि । दीर्घलो
मा विलोमा च न प्रशस्ता नतभ्रुवाम् ॥ १ ॥ प्रलम्बौ वर्त्तुलाकारौ कर्णौ भद्रफलप्रदौ । शिरालौ च कृशौ नि
न्दितौ शष्कुलीपरिवर्जितौ ॥ २ ॥ उन्नत स्वरङ्कुलो भालः कोमलश्च नतभ्रुवाम् । अर्द्धचन्द्रनिभो नित्यं सौभाग्या
रोग्यवर्द्धकः ॥ ३ ॥ व्यक्तस्वस्तिकरेखयाकुलमलं नार्य्या ललाटस्थलं सौभाग्यामलभोगकृत्तदलिकं लम्बा
यमानं यदि । अद्धा देवरमाशु हन्ति नितरां रोमाकुलं रोगदं रेखाहीनमनङ्गभङ्गजनकं ज्ञेयं बुधैः
सर्वदा ॥ ४ ॥ करिपुंगवकुंभसमान उत प्रवरोन्नत एव कदम्बनिभः । इह मौलिरजस्रमिला विमला विवि
धा बहुधान्ययुता सुदृशः ॥ ५ ॥ पीनमौलिरतिमानहारिका दारिका कुजनसङ्गकारिका । लम्बमौलि

र्पि सर्व्वनाशिका वन्धकी निजकुलान्तकारिका ॥ ६ ॥ केशा यस्या भ्रमरपटलीपक्षवर्णाः सुवर्णा वक्राकाराः कुवलयदृशः किंचिदाकुंचिताग्राः । भाग्यं सद्यो ददति विरलाः पिंगलाः स्थूलरूपा रुक्षाकाराः परमलघवो बन्धवैधव्यदुःखम् ॥ ७ ॥ मशकोपि ललाटपट्टवर्त्ती यदि जागर्त्ति समध्यगो भ्रुवोर्वा । तनुते सुखमर्थराशिभोगं सततं पत्युरपत्यभृत्ययोश्च ॥ ८ ॥ मशकोऽपि कपोलमध्यगामी सुदृशो लोहित एवमिष्टदः स्यात् । हृदयं तिलकेन शोभितं लशुनेनापि च राजनकारणम् ॥ ६ ॥ लोहितेन तिलकेन मण्डितं सुभ्रुवो हि कुचमण्डलं यदा । जायते किल सुताचतुष्टयं वालकत्रयमुदीरितन्तदा ॥ १० ॥ भवति वामकुचेऽरुणलांछनं शुभदृशस्तिलकं कमलप्रभम् । प्रथमतस्तनयं परिसूय सा कृतिवरं विधवा तदनन्तरम् ॥ ११ ॥ लसति वालमधुव्रतसन्निभं शुभदृशस्तिलकं गुददक्षिणे । नरपतेरवला कमलालया नृपमपत्यमरं जनयेदलम् ॥ १२ ॥ मशकोपि च नासिकाग्रगामी सुदृशो विद्रुमकान्तिरर्थदायी । अलिपक्षनवाभ्ररूपधारी पतिहन्त्री किल पूंश्चली विशेषात् ॥ १३ ॥ यदि नाभेरधोभागे तिलकं लांछनं स्फुटम् । सौभाग्यसूचकं ज्ञेयं मशको वा नतभ्रुवाम् ॥ १४ ॥ यदि करे च कपोलतलेयवा भवति कंठगतं तिलकं तदा । सुतिलेपि च सा प

तिवल्लभा वरदृशो मशकाभलक्ष्मांकनैः ॥ १५ ॥ भालस्थेन त्रिशूलेन शंभुना निर्मितेन वै । यस्याः सालीसह
स्राणामीशतामाप्नुयाद्वरम्॥ १६ ॥ किटकिटेति कलं कुरुते मिथः शुभदृशः शयने तु रदावली । मदृदमङ्गल
माह विशेषतः प्रियतमे तनुलक्षणकोविदः ॥ १७ ॥ शकटवद्यदि योनिललाटगो मृगदृशो मृदुलोमगणो
भवेत् । वरदुकूलमणिव्रजमण्डिता क्षितिभृतां वनिता वनिताहृता ॥ १८ ॥ विलसति भगभाले दक्षिणावर्त्तरूपः
कुवलयनयनायाः कोमलो लोमसंघः । नरपति कुलभर्त्तुः कामिनीमानिनी नामिह भवति वदान्या सैव धन्या
विशेषात् ॥ १९ ॥ कण्ठावर्त्ता भवति कुलटा भर्तृहन्त्री कुरूपा पृष्ठावर्त्ता कठिनहृदयास्वामिहन्त्री कु
लघ्नी । आवर्त्तौ वा भवत उदरे द्वाविहैकोपि यस्याः सापि त्याज्या कृतिभिरवला लक्षणज्ञैस् दूरात् ॥ २० ॥
सीमन्ते च ललाटे वा कंठे वापि नतभ्रुवः । लोम्नामावर्त्तको दक्षो वामो वैधव्यसूचकः ॥ २१ ॥ याभिरेव
वरदो महेश्वरः पूजितः किल पुराव्रतादिभिः । पार्व्वती च परिपूजिता मुदा भक्तियोगविधिना सुवासिनी
॥ २२ । भूषितामलविभूषणादिभिः क्षालितं वपुरनेकधा पुरा । तीर्थराजपयसा भवन्ति ता लक्षणैरिह शुभैः
सुलक्षणाः ॥ २३ ॥ कृतं न हि तपो यया नगजया समाराधितो हरो न हि रविव्रतं न हि कृतं च तीर्थाटनम् ।

धनं न हि धरामरे परममर्प्पितं तर्प्पितं गुरोः कुलमिहाङ्गना भवति सैव हीनाङ्गना ॥ २४ ॥ यतः सुलक्षणैरेषा योषा हीनायुषं पतिम् । दीर्घायुषं सुचरितैः प्रकरोति सुखास्पदम् ॥ २५ ॥ दीर्घायुषं पतिं हन्ति कुयोगैश्च कुलक्षणैः । अतः सुलक्षणा कन्या परिणेया विचक्षणैः ॥ २६ ॥ कुलक्षणविलक्षिता यदि सुतात्र सं जायते श्रुतिस्मृतिपथानया परमसोमवारीव्रतम् । विधाय तदनन्तरं रहसि कारयित्वा चुतद्रुमेण हरिणा कृतो शुभघटेन पाणिग्रहम् ॥ २७ ॥ शुभाहनि कुमारिकाकरनिपीड़नं कारयेद्वरेण चिरजीविना पुनरिदं न दोषायते । इदं तु बहुसंमतं मुनिवरेण गीतं पुनः प्रमाणपटुनाहृतं प्रियविनोदवृन्दप्रदम् ॥ २८ ॥ कुलक्षणैः कुयोगैश्च लक्षिता वनिता यदा । तस्याः पूर्व्वविधानेन विवाहं कारयेद्बुधः ॥ २९ ॥ जीवनाथविदुषात्र कामिनीलक्षणं बुधमनो मुदे मया । स्कन्दकुंभभवयोर्विवादजं व्यासगीतमखिलं प्रकाशितम् ॥ ३० ॥ इति श्रीजीवनाथदैवज्ञविरचिते भावकुतूहले स्त्रीलक्षणाध्यायः ॥ अथ शयनादिद्वादशावस्थाध्यायः ॥ प्रथमं शयनं ज्ञेयं १ द्वितीयमुपवेशनम् २ ॥ नेत्रपाणिः ३ प्रकाशश्च ४ गमना ५ गमने ६ ततः ॥ १ ॥ सभावस्था ७ ततो ज्ञेया चागमो ८ भोजनं तथा ९ ॥ नृत्यलिप्सा १० कौतुकं च ११ निद्रावस्था १२ नभः सदाम् ॥ २ ॥

ख चं मं बु बृ गु भृ रा के

५ २ २ ३ ५ ३ ३ ४ ४ शेषांकाः

ग्रहर्क्षसंख्या खगमाननिघ्नी खेटांशसंख्यागुणिता ग्रहाणाम् । निजेष्टजन्मर्क्षतनुप्रमाणैर्युतार्क १२ नष्टा शयनाद्यवस्था ॥ ३ ॥ शेषं शेषहतं खराङ्कसहितं लष्टं पुनर्भानुना सद्ध्येपं गुणशेषितं खलु भवेद्दृष्टाद्यवस्था त्रिधा । पंच ५ द्वि २ द्वि २ गुणा ३ च ५ राम ३ गुण ३ वेदाः ४ क्षेपकांकारवेः प्राचीनैर्यवनादिभिः समुदितास्तेमी निबद्धा मया ॥ ४ ॥ प्रथमं श्लोकद्वयं सुगमम् ॥ ग्रहर्क्षसंख्येति ॥ जन्मकाले यस्मिन्नक्षत्रे ग्रहो स्ति तन्नक्षत्रसंख्या ग्रहर्क्षसंख्या ज्ञेया, सा ग्रहप्रमाणेन निघ्नी गुण्या पुनर्ग्रहस्य वर्त्तमानांशसंख्यया गुणनीया ततो निजेष्टदण्डजन्मनक्षत्रजन्मलग्नप्रमाणाङ्केन युक्ता द्वादशभिस्तष्टा शेषाङ्कमिता ग्रहस्य शयनाद्यवस्था स्या दिति एकशेषे शयनावस्था द्विशेषे उपवेशनावस्था त्रिशेषे नेत्रपाणिरेवमग्रेपि ॥ अथदृष्टाद्यवस्थानयनम् ॥ शेषमिति । पूर्वस्मिन्नर्कशेषिते यच्छेषं तदेव शेषमिति शेषेण शेषप्रमाणाङ्केन संगुण्य खराङ्कप्रमाणेन युक्तं कार्य्यम् । अयमर्थः । खरोदयग्रन्थात्खराङ्कप्रमाणं विज्ञाय तत्र क्षेपं खराङ्कज्ञानार्थं चक्रं लिख्यते ।

१	२	३	४	५
अ	इ	उ	ए	ओ
क	ख	ग	घ	च
छ	ज	झ	ट	ठ
ड	ढ	त	थ	द
ध	न	प	फ	व
भ	म	य	र	ल
व	श	ष	स	ह

अत्र चक्रे प्रसिद्धनामाक्षरं यत्र स्यात्तदुपरि स्वराङ्कमवलोक्य मानं ज्ञेयम्। ननु सर्वत्र जन्मनामाक्षरस्य मुख्यतायां सत्यां कथमत्र प्रसिद्धनामाद्यक्षरग्रहणमिति चेदुच्यते। स्वरशास्त्रे प्रसिद्धनाम्नो मुख्यताप्रतिपादनदर्शनात्। प्रसुप्तेप्रायेन जागर्तीत्युक्तेः। यथा अकारस्यैकं इकारस्य द्वयं उकारस्य त्रयं एकारस्य चतुष्टयं ओकारस्य पंचेति एवं स्वराङ्क मानं ज्ञात्वा योजयेत्। ततोरविभिरवशिष्टं क्षेपाङ्कयुतं शेषं कार्य्यं। ततः त्रिभिरवशिष्टं एकादिशेषे दृष्ट्याद्यवस्था ज्ञेया। एकेन दृष्टिः द्वाभ्यां चेष्टा त्रिभिर्विचेष्टेति। अस्योदाहरणार्थं कस्य चित्पु रुषस्य जन्मसमयादिकं लिख्यते। पौषशुक्लपञ्चम्यां शुक्रे धनिष्ठा ४ चरणे मियुनलग्ने जन्मासीत्। इष्टं २६। लग्नं मियुनम्. तत्र जन्मसमये मूलनक्षत्रे रविरस्ति धनिष्ठायां चन्द्रः, श्रवणे कुजः, पूर्वाषाढे बुधः, गुरुरार्द्रायाम्, शुक्रः पूर्वाषाढे, शनिर्मूले, पूर्वफल्गुन्यां राहुः. पूर्वभाद्रे केतुरिति॥ अथ रव्यादीनामंशाः॥ सूर्यस्य सप्त ७ भौमस्य रुद्राः ११ बुधस्योत्कृतयः २६ गुरोरेकादश ११ शुक्रस्य पञ्चविंशतिः २५ शनेः सप्त ७ राहोस्त्रयोविंशतिः २३ केतो

स्व २३ ॥ अथोदाहरणम् ॥ अत्र मूलनक्षत्रे रविस्तत्संख्या १९ रविसंख्यया १ गुणिताः १९ धनुषः सप्तांशे रविस्तेन सप्त भिर्गुणिता जाताः १३३ । इष्टं २६ धनिष्ठा जन्मभं २३ मिथुनलग्नं ३ एषां योगेन युताः १८५ रवितष्टाः शेषं ५ तेन शयनादिगणनया गमनावस्थायां रविर्ज्ञेयः। एवं चन्द्रादीनामपि अत्र शेषं ५ स्वराङ्कस्थानं यथात्र प्रसिद्धनामाद्य क्षरस्य गकारस्य उकाराधः पंक्तौ स्थित्या तत्स्वरसंख्या ३ त्रिमितेति। शेषं ५ शेषेण ५ गुणितं २५ स्वराङ्क ३ युतं २८ रवितष्टं ४ सूर्यक्षेपकेन ५ युतं ९ त्रिभिस्तष्टम् ० शून्यमतो रवेर्विचेष्टावस्था, चन्द्र उपवेशे विचेष्टायां, कुजः प्रकाशे विचे ष्टायाम् बुध, आगमने दृष्टौ, गुरुर्नृत्यलिप्सायां विचेष्टायाम्। शुक्रप्रकाशेः दृष्टे, राहुर्निद्रायां दृष्टौ, केतुः सभायां चेष्टा याम् ॥ अथ स्थानतारतम्येन रव्यादीनामवस्थाफलम्। त्रिकोणे वा कर्मण्यपि नयनपाणौ दिनमणेः फलं शस्तं ज्ञेयं रुदन सदने नन्दनपदे। प्रकाशे मार्त्तण्डे स्मृतिपदमपत्यं जनिवतां तथा जाया याति व्ययमदनम ने च जनने ॥ १ ॥ पुण्यबाधाकरः पुण्यमे भोजने कौतुके वैरिमे वैरिहन्ता रविः। सप्तमे पञ्चमे तत्र गो वा भवेदङ्गनापुत्रहा लि[illegible] प्रदः ॥ २ ॥ अथ चन्द्रस्य ॥ चन्द्रस्य द्वादशावस्थाफलं शुक्लदले शुभम्। अशुभं कृष्णपक्षे तु विज्ञेयं गणकोत्तमैः ॥ ३ ॥ अथ कुजफलम् ॥ मदननन्दनगोऽवनिनन्दनः शयनगस्य कलत्रसुतक्षयम्। प्रथमतः कुरुते रिपुगो

स्थितो रिपुगृहे करभङ्गमनङ्गत: ॥ ४ ॥ यदि युत: शनिनापि च राहुणा शिरसि रोगकरो धरणीसुत: । तनु
गत: शयने नयने गदं वितनुते नितरां चतमङ्गिनाम् ॥ ५ ॥ अङ्गारकोङ्गे यदिनेत्रपाणौ करोत्यनङ्गाति श
येन भङ्गम् । भुजङ्गदन्तचतपावकाम्बुभयं नगे हानिमिहाङ्गनायाः ॥ ६ ॥ प्रकाशने पंचमसप्तमस्थः सुतं नि
हत्या शु निहन्ति वामाम् ॥ पापान्वित: पापखगान्तराले कुकर्म्मिणां केतुवरं करोति ॥ ७ ॥ अथ बुधकृत
फलम् ॥ नेत्रपाणौ सुते सौम्ये पुत्रहानिः सुतागमः । सभायामेव कन्यानामाधिक्यं मदने सुते ॥ ८ ॥
अथ गुरुफलम् ॥ भवति देवगुरौ यदि भोजने तनुगते धनुजोऽहि धनुर्द्धरः । नवमपञ्चमभे धनवर्जितो
भवति पापयुतो विसुतो नरः ॥ ६ ॥ अथ शुक्रफलम् ॥ तनुगृहे मदने दशमे सितो नयनपाणिगतो यदि
जन्मनि । शुभमतीव फलं तनुते वलं दसनभङ्गमनङ्गविवर्द्धनम् ॥ १० ॥ अथ शनिफलम् ॥ यत्र कुत्र स्थितो म
न्दो जन्मकाले विशेषत: । अवस्थानामसदृशं वितनोति शुभाशुभम् ॥ ११ ॥ अथ राहुफलम् ॥ नवमे मदने
वापि राहुराहुरिहाङ्गिनाम् । मत्तान्तो निद्रितोवश्यं पुण्यक्षेत्रनिवासताम् ॥ १२ ॥ द्वितीये द्वादशे वापि
लाभे वा सिंहिकासुते । वसुधां भ्रमते मर्त्यो विधन: शयने भवेत् ॥ १३ ॥ निजक्षेत्रे तुङ्गे कविबुधगृहे मित्र


भवने खवर्गे सहर्गे तमपि शयने अन्तसमये । फलं पूर्णं प्राहुः कथितभवनादन्यभवने तदा दुष्टं प्रांचस्ति
ह शिखिनो राहुवदिदम् ॥ १४ ॥ अथ विशेषफलम् ॥ यदि निद्रागतः पापः सप्तमे पापपीड़ितः । तदा जाया
विनाशः स्याच्छुभयोगेक्षणान्नहि ॥ १५ ॥ निद्रितो रिपुगेहस्थो रिपुयुक्तोक्षितो मदे । भार्य्या विनश्यति क्षिप्रं विधि
ना रक्षितापि चेत् ॥ १६ ॥ शुभयोगेक्षणादेका विनश्यति परा नहि । शुभाशुभदृशा भार्य्या कष्टयुक्ता क्षणं
भवेत् ॥ १७ ॥ अथ पुत्रसुखयोगः ॥ अपत्यभावे यदि तुङ्गगेहे निजालये पापयुतेक्षितश्चेत् । निद्रागतोऽ
पत्यविनाशकारी शुभेक्षितश्चैक सुतस्य हन्ता ॥ १८ ॥ अथापमृत्युयोगः ॥ राहुणा सहितौ यस्य निधनस्थौ
कुजार्कजौ । अपमृत्युर्भवेत्तस्य शस्त्रघातान्न संशयः ॥ १९ ॥ निधनेपि शुभो यस्य पापारिग्रहवीक्षितः । तदा
मृत्युं विजानीयादाहवे शस्त्रपीड़नात् ॥ २० ॥ अथारिक्ततीर्थकृतमृत्युयोगः ॥ यदा निद्रायुक्तो निधनभवने
पापमिलितः शयानो वा मृत्युं व्रजति रिपुकोपेन मनुजः । शुभैर्दृष्टो युक्तो निजपतियुतो वान्तसमये नरो ग
ङ्गामेत्य व्रजति हरिशायुजपदवीम् ॥ २१ ॥ अथ पुण्यक्षेत्रलाभयोगः ॥ यदापश्येदङ्गं तनुभवननाथोऽष्टमपति
र्हितिधर्म्माधीशो जनुषि च तपःस्थानमथवा । शुभाभ्यामाक्रान्तं नवमभवनं पापरहितं वरक्षेत्रं प्राप्य व्रजति मनु

ओ मोच्चपदवोम् ॥ २२ ॥ इति श्रीभावकुतूहले स्थानवशेनावस्थाफलकथनाध्यायः ॥ ॥ अथ ग्रहाणां प्रत्येक द्वादशावस्थाफलानि ॥ अथ शयनगतसूर्य्यफलम् ॥ मन्दाग्निरोगो बहुधा नराणां स्थूलत्वमंघ्रेरपि पित्तकोपः ॥ व्रणं गुदे शूलमुरःप्रदेशे यदोष्णभानौ शयनं प्रयाते ॥ १ ॥ दरिद्रताभारविहारशाली विवादविद्याभिरतो नरः स्यात् । कठोरचित्तः खलु नष्टवित्तः सूर्य्ये यदा चेदुपवेशनस्थे ॥ २ ॥ नरः सदानन्दधरो विवेकी परोपकारी बलवित्तयुक्तः । महासुखी राजकृपाभिमानी दिवाधिनाथे यदि नेत्रपाणौ ॥ ३ ॥ उदारचित्तः परिपूर्णवित्तः सभासु वक्ता बहुपुण्यकर्त्ता । महाबली सुन्दररूपशाली प्रकाशने जन्मनि पद्मिनीशे ॥ ४ ॥ प्रवासशाली किल दुःखमाली सदालसी धीधनवर्ज्जितश्च । भयातुरः कोपपरो विशेषाद्दिवाधिनाथे गमने मनुष्यः ॥ ५ ॥ परदाररतो जनतारहितो बहुधा गमने गमनाभिरुचिः । कृपणः खलताकुशलो मलिनो दिवसाधिपतौ मनुजः कुमतिः ॥ ६ ॥ सभागते हिते नरः परोपकारतत्परः सदार्थरत्नपूरितो दिवाकरे गुणाकरः । वसुन्धरानवाम्बरालयान्वितो महाबली विचित्रमित्रवत्सलः कृपाकलाधरः परः ॥ ७ ॥ क्षोभितो रिपुगणैः यदा नरः चंचलः खलमतिः कृशस्तथा । धर्म्मकर्म्मरहितो मदोद्धतस्त्वागमे दिनपतौ यदा तदा ॥ ८ ॥ सदाक

स्त्रिवेदना पराङ्गमाधनक्षयो बलक्षयः पदे पदे यदा तदा हि भोजने । असत्पथाशिरोव्यथा तथा वृथान्न भोजनं खावसत्कथारतिः कुमार्गगामिनी मतिः ॥ ९ ॥ विज्ञलोकैः सदा मण्डितः पण्डितः काव्यविद्यानवद्य प्रलापान्वितः । राजपूज्यो धरामण्डले सर्वदा वृत्यलिप्सागते पद्मिनीनायके ॥ १० ॥ सर्वदानन्दधर्त्ता जनो ज्ञानवान्यज्ञकर्त्ता धराधीशसद्मस्थितः । पद्मबन्धावरातीभपञ्चाननः काव्यविद्याप्रलापी मुदा कौतुके ॥ ११ ॥ निद्राभरारक्तनिभे भवेतां निद्रागते लोचनपद्मयुग्मे । रवौ विदेशे वसतिर्जनस्य कलत्रहानिः कतिधार्थनाशः ॥ १२ ॥ अथ चन्द्रस्य प्रत्यवस्थाफलम् ॥ जनुःकाले क्षपानाथे शयनं चेदुपागते । मानी शीतप्रधानी च कामी वित्तविनाशकः ॥ १ ॥ रोगार्द्दितो मन्दमतिर्विशेषाद्वित्तेन हीनो मनुजः कठोरः । अपायकारी परवित्तहारी क्षपाकरे चेदुपवेशनस्थे ॥ २ ॥ नेत्रपाणौ क्षपानाथे महारोगी नरो भवेत् । अनल्पजल्पको धूर्त्तः कुकर्म्मनिरतः सदा ॥ ३ ॥ यदा राकानाथे गतवति विकाशं च जनने विकाशः संसारे विमलगुणराशेरवनिपात् । नवा शालामाला करितुरगलक्ष्मया परिवृता विभूषा योषाभिः सुखमनुदिनं तीर्थगमनम् ॥ ४ ॥ सितेतरे पापरते निशाकरे विशेषतः क्रूरतरो नरो भवेत् । सदाक्षिरोगैः परिपीडयमानो वलक्षपक्षे गमने भयातुरः ॥ ५ ॥

विद्यावागमने मानी पादरोगी नरो भवेत् । गुप्तपापरतो दीनो मतितोषविवर्जितः ॥ ६ ॥ सकलजन
वदान्यो राजराजेन्द्रमान्यो रतिपतिसमकान्तिः शान्तिकृत्कामिनीनाम् । सपदि सदसि याते चारुबिम्बे शशाङ्के
भवति परमरीतिप्रीतिविज्ञो गुणज्ञः ॥ ७ ॥ विद्यावागमने मर्त्यो वाचालो धर्म्मपूरितः । कृष्णपक्षे द्विभार्य्यः स्या
द्रोगी दुष्टतरो हठी ॥ ८ ॥ भोजने जनुषि पूर्णचन्द्रमा मानयानजनतासुखं नृणाम् । आतनोति वनिता
सुतासुखं सर्वमेव न सितेतरे शुभम् ॥ ६ ॥ नृत्यलिप्सागते चन्द्रे सबले बलवान्नरः । गीतज्ञो हि रसज्ञश्च कृष्णे
पापकरो भवेत् ॥ १० ॥ कौतुकभवनं गतवति चन्द्रे भवति नृपत्वं वा धनपत्वम् । कामकलासु सदा कुशलत्वं वार
वधूरतिरमणपटुत्वम् ॥ ११ ॥ निद्रागते जन्मनि मानवानां कलाधरे जीवयुते महत्वम् । यदा गुना संचितवित्त
नाशः शिवालयं रीति विचित्रमुच्चैः ॥ १२ ॥ अथ कुजस्यप्रत्यवस्थाफलम् ॥ शयने वसुधापुत्रे जनुरङ्के जनो
भवेत् । वहुना कण्डुना युक्तो ददुणा च विशेषतः ॥ १ ॥ वली सदा पापरतो नरः स्यादसत्यवादी नितरां
प्रगल्भः । धनेन पूर्णो निजधर्म्महीनो धरासुते चेदुपवेशनस्थे ॥ २ ॥ यदा भूमिसुते लग्ने नेत्रपाणिमुपागते ।
दरिद्रता सदा पुंसामन्यभे नगरेशता ॥ ३ ॥ प्रकाशो गुणस्यापि वासः प्रकाशे धराधीशमन्तुः सदा मामहद्धिः ।

सुते भूसुते पुत्रकान्तावियोगो युते राकुणा दारुणा वा निपातः ॥ ४ ॥ गमने गमनं कुरुतेऽनुदिनं व्रणजाल भयं वनिताकलहम् । वहुदद्रुककण्डुभयं बहुधा वसुधातनयो वसुदानिमरैः ॥ ५ ॥ आगमने गुणशाली ना मणिमाली करालकरवाली । गजगन्ता रिपुहन्ता परिजनसन्तापहारको भौमे ॥ ६ ॥ तुङ्गे युद्धकला कलापकुशलो धर्म्मध्वजो वित्तपः कोणे भूमिसुते सभामुपगते विद्याविहीनः पुमान् । अन्तेऽपत्यकलत्रमित्ररहित: प्रोक्तेतरस्थानगेऽवश्यं राजसभावुधो बहुधनी मानी च दानी जनः ॥ ७ ॥ आगमे भवति भूमिजे जनो धर्म्म कर्म्म रहितो गदातुरः । कर्णमूलगुरुशूलरोगवानेव कातरमतिः कुसङ्गमी ॥ ८ ॥ भोजने मिष्टभोजी च जनने सबले कुजे । नीचकर्म्मकरो नित्यं मनुजो मानवर्जितः ॥ ६ ॥ नृत्यलिप्सागते भूसुते जन्मिनामिन्दिराराशिरायाति भूमीपतेः । स्वर्णरत्नप्रवालैः सदा मण्डिता वासशाला विशाला नराणां भवेत् ॥ १० ॥ कौतुकी भवति कौतुके कुजे मित्रपुत्रपरिपूरितो जनः । उत्थगे नृपतिगेहपण्डितो मण्डितो वुधवरैर्गुणाकरैः ॥ ११ ॥ निद्रावस्थागते भौमे क्रोधी धीधनवर्जितः । धूर्त्तो धर्म्मपरिभ्रष्टो मनुष्यो गदपीड़ितः ॥ १२ ॥ अथ वुधस्य प्रत्ययवस्था फलम् ॥ क्षुधातुरो भवेदङ्गे खंजो गुह्यानिभेक्षणः । अन्यभे लंपटो धूर्त्तो मनुजः शयने वुधे ॥ १ ॥ शशाङ्क पुत्रे



जनुरङ्गगेहे यदोपवेशे गुणराशिपूर्णः। पापेक्षिते पापयुते दरिद्रो हितोच्चभे वित्तसुखी मनुष्यः ॥ २ ॥ विद्या विवेकरहितो हिततोष हीनो मानी जनो भवति चन्द्रसुतेऽक्षिपाणौ। पुत्रालये सुतकलत्र सुखेनहीनः कन्या प्रजो नृपतिगेहवुधोवरार्य्यः ॥ ३ ॥ दाता दयालुः खलु पुण्यकर्त्ता विकाशने चन्द्रसुते मनुष्यः। अनेकविद्यार्णव पारगन्ता विवेकपूर्णः खलगर्वहन्ता ॥ ४ ॥ गमनागमने भवतो गमने बहुधा बसुधा वसुधाधिपतेः। भवने च विचित्रमलं रमया विदि नुस्वजनुः समये नितराम् ॥ ५ ॥ सपदि विदि जनानामुच्चभे जन्मकाले सदसि धनसमृद्धिः सर्वदा पुण्यवृद्धिः। धनपतिसमता वा भूपता मन्त्रिता वा हरिहरपदभक्तिः सात्विकी मुक्तिरद्धा ॥ ६ ॥ आगमे ज नुषि जन्मिनां यदा चन्द्रजे भवति हीनसेवया। अर्थसिद्धिरपि पुत्रयुग्मता वालिका भवति मानदायिका ॥ ८ ॥ भोजने चन्द्रजे जन्मकाले यदा जन्मिनामर्थहानिः सदा वादतः। राजभीत्या कृशत्वं चलत्वं मतेरङ्गसङ्गो न जाया न मायासुखम् ॥ ९ ॥ नृत्यलिप्सागते चन्द्रजे मानवो मानयानप्रवालव्रजैः संयुतः। मित्रपुत्रप्रतापैः सभा पण्डितः पापभे वारवामारतेर्लम्पटः ॥ १० ॥ कौतुके चन्द्रजे जन्मकाले नृणामङ्गमे गीतविद्यानवद्या भवेत्। सप्तमे नैधने वारवधूरतिः पुण्यभे पुण्ययुक्तामतिः सन्नतिः ॥ ११ ॥ निद्राश्रितं चन्द्रसुतेन मुद्रासुखं सदा व्याधि

समाधियोगः । सद्बोत्थवैकल्यमनल्पतापो निजेन वादो धनमाननाशः ॥ १२ ॥ अथ गुरोःप्रत्यवस्थाफलम् ॥
वचसामधिपे तु जनुःसमये शयने बलवानपि हीनरवः । अतिगौरतनुः खलु दीर्घहनुः सुतरामरिभीतियुतो
मनुजः ॥ १ ॥ उपवेशं गतवति यदि जीवे वाचालो बहुगर्वपरीतः । क्षोणीपतिरिपुजनपरितप्तः पदजं वास्य
करव्रणयुक्तः ॥ २॥ नेत्रपाणिं गते देवराजार्चिते रोगयुक्तो वियुक्तो वरार्यश्रिया । गीतनृत्यप्रियः कामुकः सर्वदा
गौरवर्णो विवर्णाङ्गवप्रीतियुक् ॥ ३ ॥ गुणानामानन्दं विमलसुखकन्दं वितनुते सदातेजः पुंजंव्रजपतिनिकु
ञ्जं प्रतिगमम् । प्रकाशं चेदृच्चे द्रुतमुपगतो वासवगुरुर्गुरुत्वं लोकानां धनपतिसमत्वं तनुभृताम् ॥ ४ ॥
साहसी भवति मानवः सदा मित्रपुत्रसुखपूरितो मुदा । पण्डितो विविधवित्तमण्डितो वेदविद्यदि गुरोगमं गते
॥ ५ ॥ आगमने जनतावरजाया यस्य जनुःसमये हरिमाया । मुंचति नालमिहालयमद्धा देवगुरौपरितः
परिवद्धा ॥ ६ ॥ सुरगुरु समवक्ता शुभ्रमुक्ताफलाढ्यः सदसि सपदि पूर्णोवित्तमाणिक्ययानैः । गजतुरगर
थाढ्योदेवताधीशपूज्ये जनुषि विविधविद्यागर्वितो मानवः स्यात् ॥ ७ ॥ नानावाहनमानयानपटलीसौख्यं
गुरावागमे भृत्यापत्यकलत्रमित्रजसुखं विद्यानवद्या भवेत् । क्षोणीपालसमानतानवरतं यातीव हृद्या मतिः का

व्यानन्दरतिः सदा हितगतिः सर्वत्र मानोन्नतिः ॥ ८ ॥ भोजने भवति देवतागुरौ यस्य तस्य सततं सुभोजनम् ।
नैव मुंचति रमालयं तदा वाजिवारणरथैश्च मण्डितम् ॥ ६ ॥ नृत्यलिप्सागते राजमानी धनी देवताधीश्वर
ध्येन सदा धर्म्मवित् । तत्त्वविज्ञो बुधैर्म्मण्डितः पण्डितः शब्दविद्यानवद्यो हि सद्यो जनः ॥ १० ॥ कुटुम्बी सकौ
तुके महाधनी जनः सदा निजान्वयाजभास्करः कृपाकलाधरः सुखी । निलिंपराजपूजिते सुतेन भूनयन वा
युतो महाबली धराधिपेन्द्रसद्मपण्डितः ॥ ११ ॥ गुरौ निद्रागते यस्य मूर्खता सर्वकर्म्मणि । दरिद्रतापरिक्रान्तं भवनं
पुण्यवर्जितम् ॥ १२ ॥ अथ शुक्रस्य प्रत्यवस्थाफलम् ॥ जनो बलीयानपि दन्तरोगी भृगौ महारोषसमन्वितः
स्यात् । धनेन हीनः शयनं प्रयाते वराङ्गनासंगमलंपटश्च ॥ १ ॥ यदि भवेदुशना उपवेशने नवमणिव्रजका
ञ्चनभूषणैः । सुखमजस्रमरिक्षय आदराद्‌वनिपादपिमान समुन्नतिः ॥ २ ॥ नेत्रपाणिं गते लग्नगेहे कवौ सप्तमे मान
भे यस्य तस्य ध्रुवम् । नेत्रपातो निपातो धनानामलं चान्यभे वासशाला विशाला भवेत् ॥ ३ ॥ खालये तुंगभे मित्र
भे भार्गवे तुङ्गमातङ्गलीलाकलापी जनः । भूपतेकुल्य एव प्रकाशं गते काव्यविद्याकलाकौतुकी गीतवित् ॥ ४ ॥
गमने जनने शुक्रे तस्य माता न जीवति । व्याधियोगो वियोगश्च जनानामरिभीतितः ॥ ५ ॥ आगमनं भृगु

पुत्रे गतवति वित्तेश्वरो मनुजः ॥ सर्व्वार्थश्रमशाली नित्योत्साही करांघ्रिरोगी च ॥ ६ ॥ अनायासेनालं सप
दि महसा याति सहसा प्रगल्भत्वं राज्ञः सदसि गुणविज्ञः किल कवौ । सभायामायाते रिपुनिवहहन्ता धन
पतेः समत्वं वा दन्तावलतुरगगन्ता नरवरः ॥ ७ ॥ आगमे भार्गवेनागमो जन्मिनामर्थराशेररातेरती
वक्षतिः । पुत्रपातो निपातो जनानामपि व्याधिभीतिः प्रियाभोगहानिर्भवेत् ॥ ८ ॥ क्षुधातुरो व्याधिनिपी
डितः स्यादनेकधारातिभयार्द्दितश्च । कवौ यदा भोजनगे युवत्यां महाधनी पण्डितमण्डितश्च ॥ ९ ॥ काव्य
विद्यानवद्या च हृद्या मतिः सर्व्वदा द्रव्यलिप्सागते भार्गवे । शंखवीणामृदङ्गादिगानध्वनिव्रातनैपुण्यमेत
स्य वित्तोन्नतिः ॥ १० ॥ कौतुकभवनं गतवति शुक्रे शक्रेशत्वं सदसि, महत्वम् । हृद्या विद्या भवति च पुंसः
पद्मा निवसति सद्मादरतः ॥ ११ ॥ परसेवारतो नित्यं निद्रामुपगते कवौ । परनिन्दापरोऽवीपरो वाचालो भ्रमते
महीम् ॥ १२ ॥ अथ शनेःप्रत्यवस्थाफलम् ॥ क्षुत्पिपासापरिक्रान्तो विश्रान्तः शयने शनौ । वयसःप्रथमे रोगी
ततो भाग्यवतां वरः ॥ १ ॥ भानोःसुते चेदुपवेशनस्थे करालकारातिजनानुतप्तः । अपायशाली खलु दद्रुमाली
नरोऽभिमानी नृपदण्डयुक्तः ॥ २ ॥ नयनपाणिगते रविनन्दने परया रमया परमया युतः । नृपतितो हि

भा० कु०
२५

मतो मतिमोषकृद्दुकलाकलितो विमलोक्तिकृत् ॥ ३ ॥ नानागुणग्रामधनाधिशाली सदा नरोबुद्धिविनोद माली । प्रकाशने भानुसुते सुभानुः कृपानुरक्तो हरपादभक्तः ॥ ४ ॥ महाधनी नन्दननन्दितः स्यादपाय कारी रिपुभूमिहारी । गमे शनौ पण्डितराजभावं धरापतेरायतने प्रयाति ॥ ५ ॥ आगमने पदगदभययुक्तः पुत्रकलत्रसुखेन विमुक्तः । भानुसुते भ्रमते भुवि नित्यं दीनमना विजनाश्रयभावम् ॥ रत्नावलीकांचनमौक्ति कानां व्रातेन नित्यं व्रजति प्रमोदम् । सभागते भानुसुते नितान्तं नयेन पूर्णो मनुजो महौजाः ॥ ७ ॥ आगमे गदसमागमो नृणामजवम्सुतनये यदा तदा । मन्दमेव गमनं धरातले याचनाविरहिता मतिः सदा ॥ ८ ॥ संगते जनुषि भानुनन्दने भोजनं भवति भोजनं रसैः । संयुतं नयनमन्दता तता मोहतापपरिता पिता मतिः ॥ ९ ॥ स्त्यलिप्सागते मन्दे धर्म्मात्मा वित्तपूरितः । राजपूज्यो नरोधीरो महावीरो रणाङ्गणे ॥ १० ॥ भवति कौतुकभावमुपागते रविसुते वसुधावसुपूरितः । अतिसुखी सुमुखीसुखपूरितः कवितया मनया कलया नरः ॥ ११ ॥ निद्रागते वासरनाथपुत्रे धनी सदा चारुगुणैरुपेतः । पराक्रमी चण्डविपक्षहन्ता स वारकान्तारनिरीति विद्वः ॥ १२ ॥ अथ राहोः भत्यवस्थाफलम् ॥ गदागमो जन्मनि यस्य राहौ क्लेशाधिकत्वं

शयनं प्रयाते । वृषेषयुग्मेपि च कन्यकायामजे समाजो धनधान्यराशेः ॥ १ ॥ उपवेशनमिह्गतवति राहौ दद्रुगणे न जनः परितप्तः । राजसमाजयुतो वहुमानी वित्तसुखेन सदा रहितः स्यात् ॥ २ ॥ नेत्रपाणा वगे नेत्रे भवतो रोगपीड़िते । दुष्टव्यालारिचौराणां भयं तस्य धनक्षयः ॥ ३ ॥ प्रकाशने शुभासने स्थितिः कृतिः शुभा नृणां धनोन्नतिर्गुणोन्नतिः सदा विदामगाविह । धराधिपाधिकारता यशोलता तता भवेन्नवीन नीरदाकृतिर्विदेशतो महोन्नतिः ॥ ४ ॥ गमने च यदा राहौ बहु सन्तानवान्नरः । पण्डितो धनवान्दाता राज पूज्यो नरो भवेत् ॥ ५ ॥ राहावागमने क्रोधी सदाधीधनवर्जितः । कुटिलः कृपणः कामी नरो भवति सर्व था ॥ ६ ॥ सभागते यदा राहौ पण्डितः कृपणो नरः । नानागुणपरिक्रान्तो वित्तसौख्यसमन्वितः ॥ ७ ॥ चेद्गावागमं यस्य याते तदा व्याकुलत्वं सदारातिभीत्या महत् । बन्धुवादो जनानां निपातो भवेद्वित्त हानिः शठत्वं कृशत्वं तथा ॥ ८ ॥ भोजने भोजनेनालं विकलो मनुजो भवेत् । मन्दवुद्धिः क्रियाभीरुः स्त्रीपुत्र सुखवर्जितः ॥ ९ ॥ नृत्यलिप्सागते राहौ महाव्याधिविवर्द्धनम् । नेत्ररोगो रिपोर्भीतिर्द्धनधर्मक्षयो नृणाम् ॥ १० ॥ कौतुके च यदा राहौ स्थानहीनो नरो भवेत् । परदाररतो नित्यं परवित्तापहारकः ॥ ११ ॥ नि

भा० कु०
२७

युक्तो प्रमादशाली खलु पापमाली ॥ १० ॥ अथ दीनग्रहफलम् ॥ दीनेतिदीनो मतितोषहीनो जनो जनेशादि निपीड़ितश्च । गुणेन हीनः परदारलीनः परार्थहारी च कुभूमिचारी ॥ ११ ॥ अथ पीड़ितग्रहफलम ॥ पीड़िते गदनिपीड़ितः सदा चिन्तया च परया समन्वितः । व्यग्रितो बहुमदोद्धतः पुमानाधिरोगसहितो विशेषतः ॥ १२ ॥ * ॥ अथ मारकविचाराध्यायः ॥ * ॥ त्रिकोणभवनाधिपाः शुभफलास्तु सर्व्वे ग्रहास्त्रिवैरिभव भावपाः खलफला निरुक्ता बुधैः । भवन्ति यदि केन्द्रपाः शुभखगा न शस्ता नृणामतीव शुभदायकाः खलखचारिणो जन्मनि ॥ १ ॥ यद्यङ्गावगतो राहुः केतुश्च जनने नृणाम् । यद्यङ्गावेशसंयुक्तस्तत्फलं प्रदिशेदलम् ॥ मन्दश्चेत्पापसंयुक्तो मारकग्रहयोगतः । तिरस्कृत्य ग्रहान्सर्वान्निहन्ता पापकृद्यदा ॥ ३ ॥ * अल्पमध्यमपूर्णायुः प्रमाणमिह योगजम् । विज्ञाय प्रथमं पुंसां ततो मारकचिन्तना ॥ ४ ॥ चेदङ्गपो यदिरवेररिरेव हीनं पूर्णं सुहृद्यदिसमः सममायुराहुः । वा लग्नपो हितसमारिपदेऽपि पूर्णं मध्यं च हीनमिह जातकतत्त्वविज्ञाः ॥ ५ ॥ अष्टमर्क्षं तृतीयं च बुधैरायु


* मारकग्रहसंबन्धी पापकर्म्मा शनिस्तदा । तिरस्कृत्य ग्रहान्सर्वान्निहन्ता भवति ध्रुवम् ।



वदाहृतम् । द्वितीयं सप्तमस्थानं मारकस्थानमुच्यते ॥ ६ ॥ मारकेशदशाकाले मारकस्थस्य पापिनः । पाके पापयुजां पाके संभवे निधनं दिशेत् ॥ ७ ॥ असंभवे व्ययाधीशदशायां मरणं नृणाम् । अभावे व्ययभावेश संबन्धिग्रहभुक्तिषु ॥ ८ ॥ तदभावेऽष्टमेशस्य दशायां निधनं पुनः । दुष्टतारापतेः पाके निर्याणं कथितं बुधैः ॥ ९ ॥ अथ राजयोगाः ॥ नवमभाव पतिस्तनयालये सुतपतिर्नवमे यदि जन्मिनः । अतिविचित्रमणिव्रज मण्डितो वसुमतीविभुतां स नरो व्रजेत् ॥ १० ॥ कर्म्माधीशः सुतस्थाने सुखेशः कर्म्मगो यदा । त्रिकोणपति ना दृष्टो राजा भवति निश्चितम् ॥ ११ ॥ राजेशशाङ्गपवाहनेशसुतपा धर्म्मालयस्वामिना संयुक्ता यदि वोधि ताश्च बलिनो राजा भवेन्मानवः । पुत्रेशो यदिधर्म्मपेन सहितो लग्नाधिपेनाङ्गगो दृष्टो वा सहितः सुखेऽपि दशमे राजा भवेन्निश्चितम् ॥ १२ ॥ यत्रकुत्रापि केन्द्रे शस्त्रिकोणपतिना युतः । सबलो मनुजो राजा दुर्बलो धनपो भवेत् ॥ १३ ॥ अथ धनिकयोगाः ॥ पुण्यस्थाने गुरुक्षेत्रे दशमे भृगुणा युते । पंचमस्वामिना दृष्टे राज पुत्रो नराधिपः ॥ १४ ॥ पंचमे निजभे शुक्रे लाभे रविसुते यदा । मुक्तामणिसुवर्णानामधिपो जायते नरः ॥ १५ ॥ कर्कटे तु कलानाथे पंचमे लाभगे शनौ । नानाधनसमृद्धिः स्याद्धर्म्मवृद्धिश्च भूपता ॥ १६ ॥ पंच

मे तु मृगे कुंभे समन्दे यस्य जन्मनि । बुधे लाभालये तस्य सर्वतो द्रविणोन्नतिः ॥ १७ ॥ पंचमे तु रवौ सिंहे लाभे देवगुरौ सदा । वाहनस्वर्णरत्नानामधिपो जायते क्रमात् ॥ १८ ॥ पंचमे तु गुरुक्षेत्रे सगुरौ यदि जन्मनि । लाभगाविन्दुभूपुत्रौ पृथ्वीपतिसमो नरः ॥ १९ ॥ रविक्षेत्रगते लग्ने रविणा संयुते सति । गुरुभौमयुते वापि धनाधिक्यं दिने दिने ॥ २० ॥ कर्कभे जन्मलग्ने तु सचन्द्रे यदि जन्मनि । संयुते जीवभौमाभ्यां स सद्यो वित्तपो भवेत् ॥ २१ ॥ कुजक्षेत्रगते लग्ने सभौमे यस्य जन्मनि । भृगुशुक्रमन्दसंयुक्ते सधनेशसमो नरः ॥ २२ ॥ गुरुभे गुरुसंयुक्ते जन्मलग्नगते सति । चन्द्राङ्गार युते यस्य तस्य लक्ष्मीरचंचला ॥ २३ ॥ कन्यामिथुनयोर्लग्ने सबुधे यस्य जन्मनि । संयुते शुक्रमन्दाभ्यां दृष्टे वा धनिको भवेत् ॥ २४ ॥ शुक्रराशिगते लग्ने ससिते यदि जन्मनि । चन्द्रजादित्यजाभ्यां तु युते दृष्टे धनाधिपः ॥ २५ ॥ अथ दरिद्रयोगाः । त्रिकोणपतिसंबन्धी यो यो वित्तप्रदो ग्रहः । सषडष्टव्ययाधीशैर्युतो धनविनाशकः ॥ २६ ॥ लग्नगे निधनाधीशे निधने लग्नपे यदि । मारकग्रहसंयुक्ते जातो भवति निर्द्धनः ॥ २७ ॥ रिपुभावपतौ लग्ने लग्नेशे रिपुभावगे । मारकस्वामिना दृष्टे युते वा निर्द्धनो भवेत् ॥ २८ ॥ चन्द्रादित्यौ यदा लग्ने वाक्पे निधनालये । मारकेण युते दृष्टे नरो भवति

निर्द्धनः ॥ २६ ॥ यदाङ्गनाथस्त्रिकभावनाथैर्युतेक्षितः पापयुतोऽथवा स्यात् । पुत्रेश्वरेणापि युते विलग्ने शुभैर
दृष्टे च भवेदृणीशः ॥ ३० ॥ अस्तारिनीचत्रिकभावगे वा लग्नेश्वरे मारकनाथयुक्ते । भाग्याधिपे वाथ शुभैरदृष्टे
भवेदृणीशो मनुजेश्वरोपि ॥ ३१ ॥ इति दरिद्रयोगाः ॥ अथ द्वादशभावविचारः ॥ तत्रादौ तनुभावः ॥
अस्तारिव्ययगो यस्य लग्नस्वामी खलैर्युतः । सुखं निहन्ति तस्याशु सर्वभावेष्वयं विधिः ॥ ३२ ॥ लग्नपश्चन्द्र
राशीशो नीचास्तु रिपुराशिगः । विनाखर्वं त्रिकस्थश्चेद्बलहीनो ग्रहो भवेत् ॥ ३३ ॥ दुष्टस्थानगतो यस्य
चन्द्रलग्नेश्वरो यदि । कार्श्यं गदभयं नित्यं वितनोति रिपूदयम् ॥ ३४ ॥ निजोच्चे निजभे वर्गे स्वकीये लग्नपे
यदि । दीर्घायुः सुखसंयुक्तो वली भोगी प्रजायते ॥ ३५ ॥ अथ धनभावविचारः ॥ धनेशः शुक्रसंयुक्तोऽथ
वा शुक्रात्त्रिके भवेत् । संबन्धी लग्ननाथेन नेत्रयोः पीडनं भवेत् ॥ ३६ ॥ चन्द्रादित्यौ धने स्यातां निशा
न्धो मनुजो भवेत् । अर्कलग्नपकोणेशाः सुखाधिपतिना युताः ॥ ३७ ॥ तातादीनां प्रकुर्वन्ति मन्दतां नेत्रयो
रपि । उच्चगो निजगेहस्थो ग्रहो नैवात्र दोषकृत् ॥ ३८ ॥ गुरुवाग्भवनाधीशौ त्रिकस्थानगतौ यदा । मूकतां
कुरुतोप्येवं पितृमातृगृहेश्वराः ॥ ३९ ॥ ताभ्यां युतास्त्रिकस्थाने तेषां मूकत्वमादिशेत् । बलाबलविवे



केन नामकश्चो विशेषतः ॥ ४० ॥ धनाधिपो माननवायभावे वली यदा तिष्ठति जन्मकाले । रमाविहारा लयवासिनी वा निजोच्चमित्रालयगो जनानाम् ॥ ४१ ॥ अथ सहजभावः ॥ सहजे सहजाधीशे षड़ादित्रि यगेपि वा । सहजेऽपि विशेषेण भ्रातुः सौख्यं न जायते ॥ ४२ ॥ सहोत्थभावेशकुजौ सपापौ पापालये वा भवतो जनस्य । उत्पाद्य सद्यो निहतुः सहोत्थानितीरितं जातकतत्त्वविज्ञैः ॥ ४३ ॥ स्त्रीखेटः सहजाधीशः शुक्रो वाथ निशाकरः । तत्रगो भगिनीं दत्ते भ्रातरं पुरुषग्रहः ॥ ४४ ॥ अथ चतुर्थभावः ॥ सुखपतिः सुखग तनुनाथयुग्जनयति प्रवरालयमङ्गिनाम् । त्रिकगतो विपरीतमिहार्दिभिः सुखजनःपतिरेव तथा बुधैः ॥ ४५ ॥ सुखाधीशे जीवे सुखनिवहचिन्ता भृगुसुते विभूषायोषाङ्गप्रवरतुरगाणामपि बुधे । अगौ मन्दे नीचाङ्गवसुखमतेरेव दिनपे पितुश्चन्द्रे मातुः चितिनिकरचिन्ता चितिसुते ॥ ४६ ॥ त्रिकोणे वाहनाधीशे केन्द्रे च वलसंयुते । निजोच्चादिपदे नूनं वाहनं नूतनं भवेत् ॥ ४७ ॥ अथ पंचमभावः ॥ लग्नाधीशे कुजक्षेत्रे पुत्रभावपतावरौ । म्रियते प्रथमापत्यं ततोऽपि न सुतोद्गमः ॥ ४८ ॥ षड़ादित्रयगे नीचे पुत्रेशे पापसंयुते । काकवन्ध्या पतिस्तत्र केतुचन्द्रसुतौ यदा ॥ ४९ ॥ तदीशो नीचगो यत्र पुत्रभावं

न पश्यति । तत्रैव बुध मन्दौ वा काकवन्ध्यापतिर्भवेत् ॥ ५० ॥ धर्म्माधीशोऽङ्गगो नीचे सुतेशो यदि जन्मनि ।
केतुयुतौ पंचमे स्यातां पुत्रं कष्टाद्विनिर्द्दिशेत् ॥ ५१ ॥ पंचमाधिपतिः केन्द्रे त्रिकोणे वा शुभैर्युतः । तदा
पुत्रसुखं सद्यो विलोमेन विलम्बतः ॥ ५२ ॥ सन्तानभवनाधीशो जन्मलग्नाधिपस्तथा । नरराशौ तदा पुत्रः
स्त्रीराशौ कन्यका भवेत् ॥ ५३ ॥ अथ रिपुभावः ॥ रोगेशो लग्नगो यस्य निधनस्थोऽपि जन्मनि । व्रणोदयस्तु
सर्वाङ्गे सपापो न व्रणं दिशेत् ॥ ५४ ॥ एवं तातादिभावेशास्तत्तत्कारकसंयुताः । व्रणाधिपयुतास्तापि ष
ष्ठादित्रयभावगाः । तेषामपि व्रणं वाच्यं जातकज्ञैः सुकोविदैः । कारकस्य दशाकाले व्रणमागन्तुकं दिशेत् ॥ ५५ ॥
शिरोदेशे भानुर्मुखपरिसरे शीतगुरलं धरासूनुः कंठे जनयति बुधो नाभिनिकटे । गुरुर्न्नाशामध्ये पदनयन
योरेव भृगुजः शनी राहुः केतुर्व्रणमुदरभागे जनिवताम् ॥ ५६ ॥ लग्नेशो यदि भौमभे बुधयुतो रोगं मुखे
जन्मिनां रोगाङ्गाधिपती यदा कुजबुधौ चन्द्रेण वा राहुणा । मन्देनापि युतौ प्रयच्छत इति प्रायोऽङ्गगो
रात्रिपो युक्तो वा तमसा सितं च शनिना कुष्ठं तदा श्यामलम् ॥ ५७ ॥ अथ जायाभावः ॥ विना खर्चं कलत्रे
शक्तिकस्थानगतो यदि । रोगिणीन्तरुणीन्दत्ते तयातुङ्गपदं विना ॥ ५८ ॥ जायास्थानगते शुक्रे कामी भवति



मानवः । पापभे पापसंयुक्ते कवौ नारीसुखोज्झितः ॥ ५६ ॥ चतुर्थे मदिलाधीशे लग्ने लग्नाधिपे यदा । कल
त्रे वा कुटुम्बे वा व्यभिचारी नरो भवेत् ॥ ६० ॥ यावन्तो निधने खटा निजस्वामिसमीक्षिताः । तावन्तोपि वि
वाहाः स्युः प्राणिनां कथिता बुधैः ॥ ६१ ॥ जायाधीशे निजक्षेत्रे निजोच्चे कोणकंटके । शुभग्रहैर्युते दृष्टे
विवाहः सत्वरं भवेत् ॥ ६२ ॥ अथाष्टमभावः ॥ अष्टमाधिपतिः पापैर्युतो लग्नेश्वरोपि चेत् । करोत्यल्पायुषं
जातं शुभेक्षणविवर्जितः ॥ ६३ ॥ तमःशनिभ्यां निधनाधिनाथः पापैर्युतो हीनबलोऽस्तगो वा । अल्पायु
षं जातकमेव सद्यः करोति नैवोच्चनिजर्क्षगश्चेत् ॥ ६४ ॥ अष्टमस्थे रवौ वह्निः चन्द्रे तु जलयोगतः । करवाला
त्कुजे ज्ञेयं मरणं ज्वरतो बुधे ॥ ६५ ॥ गुरौ त्रिदोषतः शुक्रे क्षुधया तृषया शनौ ॥ चरस्थिरद्विःस्वभावैः परदेशे गृहे पथि
॥ ६६ ॥ केन्द्रे कोणेऽष्टमाधीशे तुङ्गादिपदगे तदा । दीर्घायुरुदितं पूर्वैर्व्यत्यये हीनमङ्गिनाम् ॥ ६७ ॥ अथ
नवमभावः ॥ लग्नादिन्दोर्नवमभवनं भाग्यमूर्च्यैः प्रदिष्टं भाग्यं तस्मात्प्रथममनुतः संविचिन्त्यं प्रयत्नात् । युक्तं
दृष्टं जननसमये स्वामिना सौम्यखेटैर्जन्तोर्भाग्यं प्रसरति विधोरेव शौक्ली कलेव ॥ ६८ ॥ सहोत्थपुत्राङ्गगतो
ग्रहश्चेद्भाग्यं प्रपश्येद्यदि वा सवीर्यः । हिरण्यमाली खलु भाग्यशाली प्रसूतिकाले यदि यस्य जन्तोः ॥ ६९ ॥

निजोच्चभे पुण्यगृहे नभोगो बली यदा तिष्ठति जन्मकाले । सपुण्यशाली नवरत्नमाली धराधिपो राजकुल प्रसूतः ॥ ७० ॥ जीवज्ञशुक्रा नवमे बलिष्ठाः सुतेशदृष्टा यदि जन्मकाले । सपुण्यकर्त्ता नृपतेरमात्यो नृपाल जातो नरपालवर्य्यः ॥ ७१ ॥ भाग्यभावाधिपे नीचे रविलग्नकरे सति । अरिगेहगते वापि भाग्यहीनो नरो भवेत् ॥ ७२ ॥ अथ दशमभावः ॥ कर्म्मभावाधिपो नीचे षडादित्रयगो पिचेत् । करोति कर्म्मवैकल्यं खोश्च खर्च्चपदं विना ॥ ७३ ॥ कर्म्माधिपे केन्द्रनवात्मजर्क्षे वधेजरदृष्टे सबले नराणाम् । तुरङ्गमातङ्गनवाम्बराणि भ वन्ति नानाधनसंयुतानि ॥ ७४ ॥ कर्म्मपः केन्द्रकोणस्थो जेरातिष्टोमादियज्ञकृत् । कूपायतनकर्म्मा च देव तातिथिपूजकः ॥ ७५ ॥ लग्नादिन्दोर्द्दशमभवने जन्मकाले नराणामादित्याद्यैः क्रमत उदिता जीविका खेच रेन्द्रैः । तातान्मातुर्न्निजरिपुकुलान्मित्रपक्षात्सहोत्थात्पत्न्याः पुत्रादपि बुधवरैर्ज्जातकज्ञैर्विशेषात् । ७६ ॥ रविशीतकराङ्ककर्म्मगानां पतिवृत्त्याभिहिता नरस्य वृत्तिः । कनकोर्णाटणोषधैर्द्दिनेशे कृषिदारम्बुसमा श्रयाच्च चन्द्रे ॥ ७७ ॥ अथ साहसवह्निधातुशस्त्रैः क्षितिजे काव्यकलाकलापतो ज्ञे । लवणद्विजकाञ्चनेभ देवैर्म्मणिगोरौप्यचयैः क्रमाच्च गुर्वोः ॥ ७८ ॥ रविजे श्रमभावनीचतः स्यादिह कर्म्मेशनवांशनाथवृत्तिः ।

हितवैरिनिजर्क्षतुङ्गसंस्थैर्हितवैरिस्ववशाद्धनाप्तिरुच्चैः ॥ ७९ ॥ अथायभावः ॥ लाभेशो यदि केन्द्रस्थो लाधिक्यं
प्रजायते । षड़ादित्रयगे नीचे लाभबाधा नृणां सदा ॥ ८० ॥ आदित्येन युतेक्षिते नृपकुलाल्लाभालये
चौरतो लाभो नित्यमथेन्दुनागजजलप्रोद्भूतवामाजनैः । भूपुत्रेण विचित्रयानमणिभूस्वर्णप्रवालादिभिर्जन्तोश्चन्द्र
सुतेन शिल्पलिखनव्यापारयोगैरलम् ॥ ८१ ॥ जीवेनापि नरेशयज्ञ गजभूस्नानक्रियाभिः सितेनालं वार
वधूगमागमगुणव्याख्यानमुक्ताफलैः । मन्देनापि गजव्रजव्यसनभूनीलेन्द्रलोहव्रजैरित्यंतत्र बहुग्रहैरभिहितो
नानार्थलाभो बुधैः ॥ ८२ ॥ अथ व्ययभावः ॥ शुभग्रहाः प्रयच्छन्ति व्ययस्था विपुलं धनम् । विपरीतं खला
जन्तोर्जन्मकाले विशेषतः ॥ ८३ ॥ क्षीणेन्दुरन्त्यगो यस्य रविणा सहितो यदि । तस्य वित्तं हरेद्राजा कुजे
नापि युतेक्षितः ॥ ८४ ॥ इति भावकुतूहले द्वादश भावविचाराध्यायः ॥ * ॥ अथ दशानयनाध्यायः ॥
रसा ६ आशाः शैला वसुविधुमिता भूपतिमिता नवेलाः शैलेला नगपरिमिता विंशतिमिताः । रवाविन्दा
वारे तमसि च गुरौ भानुतनये बुधे केतौ शुक्रे क्रमत उदिताः पाकशरदः ॥ १ ॥ कृत्तिकातस्त्रिरावृत्त्या दशा
विंशोत्तरी मता । अष्टोत्तरी न संग्राह्या मारकार्थं विचक्षणैः ॥ २ ॥ गतर्क्षनाडीनिहता दशाब्दैर्भभोगनत



यया विहृता फलं यत् । वर्षादिकं भुक्तमिह प्रवीणैर्भोग्यं दशाब्दान्तरितं निरुक्तम् ॥ ३ ॥ दशा दशाहता कार्य्या विहृता परमायुषा । अन्तर्दशाक्रमादेवं विदशाप्यनुपाततः ॥ ४ ॥ अथ सूर्य्यदशाफलम् ॥ उद्वेगता हृदि तता परितो लतावद्दायादवाद उत वित्तवियोगयोगः । चिन्ता भयं नरपतेरपि पाककाले रोगागमो भवति भानुदशाप्रवेशे ॥ ५ ॥ अथ चन्द्रदशाफलम् ॥ सदा पाके राकेशितुरधिकृतिर्भूपतिकृता सतां सङ्गो रङ्गोत्सव सवकृतिप्रीतिरतुला । अलंकारागारी रिपुकुलमलङ्कारजसुखं कलावत्या रत्यागम इभरथारामरमणम् ॥ ६ ॥ अथ भौमदशाफलम् ॥ अनलगरलभीतिः शस्त्रघातो नराणामरिगणनृपचौरव्यालशङ्काकुलत्वम् । क्षितिसुतपरिपाके कामिनीपुत्रकष्टं भवति वमनमाधिव्याधिरर्थच्युतिश्च ॥ ७ ॥ अथ राहुदशाफलम् ॥ राकेशाराति पाके नृपकुलवशतो द्रव्यनाशो विनाशो मानस्यातीव रोगागमनमपि नृणां तातकष्टं विशेषात् । कान्तापत्या कुलत्वं हितजनखलताऽरातिरायाति सद्मव्यामोहागारमन्तः परित उततता रङ्कतातङ्कता वा ॥ ८ ॥ अथ गुरुदशाफलम् । उर्व्वी गुर्व्वी समायात्यवनिपतिकुलाम्नायकत्वं जनानां कान्तादन्तावलार्थागम इह कमलालंकृता वासशाला । मैत्री सद्भिर्मदद्भिर्गुरुजनगरिमा कालिमारातिकासे हृद्या विद्यानवद्या भवति वचसामी

शितुः पाककाले ॥ ९ ॥ अथ शनिदशाफलम् ॥ मिथ्यावादेन तापो नरजमहृतातङ्कता रुक्तता वा हत्या गुप्ता
प्रतप्ता मतिरपि कुजनैरर्थनाशो जनानाम् । कान्तापत्यादिरोगो जनककनकगोवाजिदन्तावलानां
विच्छेदो मित्रभेदो दिनपसुतदशायामनर्थो विशेषात् ॥ १० ॥ अथ बुधदशाफलम् ॥ दिव्याहारविहारयान
जनतापत्यार्थमानाम्बरश्रेणीग्रामनवालयेन्दुवदनालाभं विशेषादिह । सद्भिःसङ्गमनङ्गरङ्गमतुलं प्रो
त्तुङ्ग मातङ्गजं सौख्यं संतनुते दशासुयशो वृद्धिं च सिद्धिं विदः ॥ ११ ॥ अथ केतुदशाफलम् ॥ मनस्तापं
तापं निज जनविवादं खलकृतं सदाचन्द्रारातेरुदरभवरोगं वितनुते । दशा पुंसामारादनुगतिमपायं निज
मतेः कृशत्वं वित्तानामवनिपतिकोपेन परितः ॥ १२ ॥ अथ शुक्रदशाफलम् ॥ तुल्यत्वं धरणीधवेन मह
तामित्राज्जयो जन्मिनां मारोल्लासविकाश एव कमलालावण्ययुक्तं गृहम् । दिव्यारामसुधामसामवकुल
व्याख्यानगानध्वनिप्रज्ञासौख्यमतीव पाकसमये शाला विशाला कवेः ॥ १३ ॥ अथ स्वतुङ्गगतग्रहदशा
फलम् ॥ निजोच्चगामिनो यदा तदा तता यशोलता नवाम्बरादिभूषणैः सुखं वराङ्गनागमः । उपेन्द्रतुल्यता
गजेन्द्रवाजिराजिका रथो रथो वृषस्य वैरिणः कृशावशा दशा ॥ १४ ॥ अथ स्वनीचगतदशाफलम् ॥ दशानि

जागारगतस्य यस्य नवाम्बरागारविहारसौख्यम् । नवीनयोषावसुभूमिभूषायशोविशेषादरिवर्गहानिः ॥ १५ ॥ मित्रक्षेत्रगतग्रहदशाफलम् ॥ कलत्रपुत्रैरपि मित्रपुत्रैरतीव सौख्यं हितराशिगस्य । दशाविपाके वसनं नृपालाद्विशेषतो मानविवर्द्धनं स्यात् ॥ १६ ॥ रिपुराशिगतदशाफलम् ॥ मनोजवेगो रिपुवर्गभीतिः कृशत्वमर्थक्षतिराग्निबाधा । दशा यदारातिगृहस्थितस्य तदा नरस्य प्रकृतिश्चला स्यात् ॥ १७ ॥ अथ रोगेशदशाफलम् ॥ रोगाधीशदशाऽवला जनकलिं रोगागमं जन्मिनामाधिव्याधिमरिव्रजव्रणगणातङ्कं कलङ्कं खलात् । मानध्वंसमतिक्षयं कलयति ज्ञानार्थनाशं तथा चित्तव्याकुलतामपायवशतो धातुक्षयं प्रायशः ॥ १८ । अष्टमेशदशाफलम् ॥ निधनभावपतेरवनीपतेरतिभयं गदजालभयं दशा । कलयति स्वजनस्य विनाशनं निधनतामपि वा भविनामिह ॥ १९ ॥ व्ययेशदशाफलम् ॥ वित्तक्षतिरवनीशाद्दाधिव्याधिर्व्ययेशपरिपाके । कष्टं मृत्युसमानं भवति कुयानं कुसङ्गसंयोगः ॥ २० ॥ सप्तमेशदशाफलम् ॥ जायापतिपरिपाके रोगज्वाला हृदिस्थिता भवति । रिपुजनजनिता वाधा वित्तविनाशो नरेशभीतिश्च ॥ २१ ॥ अस्तगतग्रहदशाफलम् ॥ दशाधीशे वास्तं गतवति विरोधो बलवता सदा रोगागारं हृदयकुहरे वाथ जठरे । अरेराधिव्याधिव्यसनमत



मानक्षतिरथो विरामो वित्तानामवनिपतिकोपेन भविनाम् ॥ २२ ॥ दशाप्रवेशे सवलः शशाङ्को दशाफलं शस्तम
तीव जन्तोः । अतोन्यथा चेद्विपरीतमाद्यैरुदीरितं चन्द्रवलानुमानात् ॥ २३ ॥ वलवन्तो दशाधीशा दिशन्ति सकलं
फलम् । निर्वलानैव कुर्वन्ति मध्यं मध्यवला नृणाम् ॥ २४ ॥ लग्नेशस्य दशा वलं वहुधनं वित्तेशितुः पंचतां
कष्टं वेति सहोदरालयपतेः पापं फलं प्रायशः । तुर्य्यस्वामिन आलयं किल सुताधीशस्य विद्यासुखं रोगागारपते
ररातिजभयं जायापतेः शोकताम् ॥ २५ ॥ मृत्युं मृत्युपतेः करोति नियतं धर्म्मेशितुः सुक्रियाचित्तं राजपतेर्नृपा
श्रयमथो लाभं हि लाभेशितुः । रोगं द्रव्यविनाशनं च वहुधा कष्टं व्ययेशस्य वै पूर्व्वैरङ्गभृतामुदीरितमिदं तन्वा
दिभावेशजम् ॥ २६ ॥ भावाधिपो वलयुतो निजगेहगामी तुङ्गत्रिकोणशुभवर्गगतोपि पूर्णम् । जन्तोः फलं खलु क
रोति यदारिनीचस्थानस्थितोऽशुभफलं विवलो विशेषात् ॥ २७ ॥ इति भावकुतूहले दशाफलकथनाध्यायः ॥ * ॥
अथ ग्रहाणां गर्वितादिभावफलकथनाध्यायः ॥ कोणे तुङ्गगृहे गतो निगदितः खेटस्तदा(गर्वितो) मित्रर्क्षे गुरुसंयु
तोपि(मुदितो)मित्रेण युक्तेक्षितः । पुत्रस्थानगतोऽगुभौमरविजार्क्कैः संयुतो(लज्जितः)पापारिग्रहवीक्षितो हि रविणा
(संक्षोभितः)कीर्त्तितः ॥ १ ॥ यो मन्दारियुतेक्षितोऽरिभगतः खेटः(क्षुधापीड़ितो)यः पापारियुतेक्षितो न च शुभैर्दृष्टः स

(षार्त्तोऽम्बुमे। गर्वाढ्यो मुदितोऽथलज्जित इति प्रक्षोभितः कीर्त्तिता विज्ञैः संक्षुभितः तृषार्त्त इह षड्भावा ग्रहाणा ममी ॥ २ ॥ क्षुधितः क्षोभितो वापि यत्र तिष्ठति तं बलात्। विनाशयति पुष्णाति मुदितो गर्वितो ग्रहः ॥ ३ ॥ कर्म्म भावगतो यस्य लज्जितस्तृषितोऽथवा। क्षोभितः क्षुधितो वापि स दरिद्रो नरो भवेत् ॥ ४ ॥ लज्जितः पुत्रभावस्थः पुत्र नाशकरो मतः। क्षोभितस्तृषितो यस्य सप्तमे स्त्री न जीवति ॥ ५ ॥ अथ गर्वितदशाफलम् ॥ नवालयारामसुखं नृपत्वं कलापटुत्वं विदधाति पुंसाम्। सदार्थलाभं व्यवहारवृद्धिं दशाविशेषादिह गर्वितस्य ॥ ६ ॥ अथ मुदितग्रहदशाफलम् ॥ भवति मुदितपाके वास शाला विशाला विमलवसनभूषाभूमियोषासुसौख्यम्। स्वजनजनविलासो भूमिपागारवासो रिपुनिवहविनाशो वुद्धिविद्याविकाशः ॥ ७ ॥ लज्जितग्रहदशाफलम् ॥ दिशति लज्जितखेटदशावशा रतिविराममतीव मतिक्षयम्। सुतगदागमनं गमनं वृथा कलिकथाभिरुचिं न रुचिं शुभे ॥ ८ ॥ क्षोभितग्रहदशाफलम् ॥ संक्षोभितस्यापि दशा विशेषाद्दरिद्रजातङ्कमतीव कष्टम्। करोति वित्तक्षयमंघ्रिवाधां धनाप्तिबाधामवनीशकोपात् ॥ ९ ॥ क्षुधितग्रहदशाफलम् ॥ क्षुधितखगदशायां शोकमोहादितापः परिजनपरितापादाधिभीत्या कृशत्वम्। कलिरपि रिपुलोकैरर्थवाधा नराणामखिलबलनिरोधो वुद्धिरोधो विशेषात् ॥ १० ॥ तृषितखगदशाफलम् ॥ तृषितखगदशया



मङ्गिनामङ्गमध्ये भवति गदविकारो दुष्टकार्याधिकारः । निजजन[illegible] कुशलं खलकृत परिभवो मान हानिः सदैव ॥ ११ ॥ * ॥ आसीच्छ्रीकरुणाकरो बुधवरो वेदाङ्गविद्यापरस्तत्सूनुः [illegible] चिनियालवन्दितपदः श्रीशंभुनाथः कृती । विद्याभ्यासकृतादरो गणितवित्तज्ज्यो विदां प्रीतये चक्रे भावकुतूहलं लघुतरं श्रीजीवनाथः सुधीः ॥ इति श्रीमन्मैथिलशंभुनाथगणकात्मजजीवनाथविरचिते भावकुतूहले गर्विताद्दिशाफलकथनाध्यायः समाप्तः ॥ * ॥

सम्वत् १९२२ । शाके १७८७ । अग्रहायण शुक्ल द्वितीयायां सुधावर्षण

यन्त्रेऽस्य ग्रन्थस्य मुद्राङ्कनं समाप्तम् ॥

